CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 239

Title Chāndogyopaniṣad

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 239 Subject: Vedant.

Title: Chhandogyopanisad 6 to 8 Prapadhaka with Samkara's commentary.

Author: Samkara Scribe: —

Date of the work: — Date of the Ms.: V.S. 1737

Place of the work: — Place of the Ms.: —

Size: 10.8" x 6.5" Extent: 69 foll.

Language: Sanskrit. Script: Devanagari.

Remarks: Ends abruptly

श्वेतकेतुर्हारुणेय आसेत्याद्यध्यायसंबंधः॥ सर्वंखल्विदंब्रह्मतज्जलानितित्यु
क्तं॥ कथंतस्माज्जगदिदंजायतेतस्मिन्नेवचलीयतेतेनेतिचतैनैवेत्येतद्वक्तव्यमनं
तरंचैकस्मिन्न॥तुक्तेविदुषिसर्वंजगच्छुण्यत॥त्युक्तंतदेकत्वेसत्यात्मनःसर्वभूतस्थ
स्योपपद्यतेनात्मनेदेकथंचतदेकत्वमितितदर्थोयंषष्ठोऽध्याय आरभ्यते॥ पित्रा
पुत्राख्यायिकाविद्यायाःसारिष्ठत्वप्रदर्शनार्था श्वेतकेतुरितिनामतोह ऐतिह्यार्थः
॥ आरुणेयोरुणस्यपौत्र आसबभूव॥ तंपुत्रंह आरुणिःपितायोग्यंविद्याभाजनंमन्वा
नस्तस्योपनयनकालात्ययंचापश्यन्नुवाचहेश्वेतकेतोअनुरूपंगुरुंकुलस्यनोगत्वाव
सब्रह्मचर्यंनचैतद्युक्तंयदस्मत्कुलीनोहेसौम्यअननूच्यानधीत्यब्रह्मबंधुरिवभव
तीतिब्राह्मणान्बंधून्व्यपदिशंतिनस्वयंब्राह्मणवृत्तइतितस्मात्प्रवासोनुमीयतेपि
तुर्येनस्वयंगुणवान्सन्पुत्रंनोपनेष्यतिसपित्रोक्तःश्वेतकेतुःद्वादशवर्षःसन्नुपेत्याचा
र्यंयावच्चतुर्विंशतिवर्षोबभूवतावत्सर्वान्वेदांश्चतुरोप्यधीत्यतदर्थंचबुध्वामहामा

नामहद्गंभीरंमनोयस्याममात्मानमन्यैर्मन्यमानस्यसोयंमहामनाः।अनूचा
नमान्यनूचानमात्मानंमन्यतइत्येवंशीलोयःसोनूचानमानी।स्तब्धोप्रणतस्वभाव
एवायंदृष्टांस्तमेवंभूतंमहात्मनोननुरूपंशीलंतं॥स्तब्धंमानिनंपुत्रंदृष्ट्वापितोवाच
तंधर्मावतारचि॥कीर्षयाश्वेतकेतोयन्त्विदंमहामनाअनूचानमानीस्तब्धश्चासिक
स्तेतिशयःप्राप्तउपाध्यायाद्वतापितमादेशमादिश्यतइत्यादेशःकेवलंशास्त्राचा
र्योदेशगम्यतइत्येतद्येनवापरंब्रह्मातिदिश्यतेसआदेशस्तमप्राक्ष्यःपृष्टवानस्या
चार्यंतमादेशंविशिनष्टियेनादेशेनश्रुतेनाश्रुतमप्यन्यच्छ्रुतंभवत्यमतंमतमत
र्कितंतर्कितंभवत्यविज्ञातमनिश्चितंनिश्चितंभवतीतिसर्वानपिवेदानधीत्यस
र्वंचान्यद्वेद्यमधिगम्याप्यकृतार्थएवभवतियावदात्मतत्वंनविजानातीत्याख्या
यिकातोवगम्यतेतदेतदद्भुतंश्रुत्वाकथंत्वेतदप्रसिद्धमन्यविज्ञानेनान्यद्विज्ञातं
भवत्येवंमन्वानःपृच्छतिकथंनुकेनप्रकारेणहेभगवःहेभगवन्सआदेशोभव

तियथासआदेशोभवतितच्छृणुहेसोम्ययथालोकेएकेनमृत्पिंडेनचरुककुंभादि
कारणभूतेनविज्ञातेनसर्वमन्यत्तद्विकारजातंमृन्मयंमृद्विकारजातंविज्ञातंस्यान्न
नुकथंमृत्पिंडेकारणेविज्ञातेकार्यमन्यद्विज्ञातंस्यान्नैषदोषःकारणेनानन्यत्वात्का
र्यस्य॥हेभगवन्यन्मन्यसेन्यस्मिन्विज्ञातेनान्यद्विज्ञायतइतिसत्यमेवंस्याद्यद्यन्यत्का
रणात्कार्यंस्यात्नत्वेवमन्यत्कारणात्कार्यंकथंतर्हिइदंलोकेइदंकारणमयमस्य
विकारइतिशृणुवाचारंभणंवागारंभणंवागालंबनमित्येतत्कोसौविकारोनामधेयं
नामैवनामधेयंस्वार्थेधेयप्रत्ययोवागालंबनमात्रंनामैवकेवलंनविकारोनामवस्त
स्तिपरमार्थतोमृत्तिकेत्येवमृत्तिकैवतुसत्यंवस्त्वास्तियथाचसौम्यैकेनलोहमणिना
सुवर्णपिंडेनसर्वमन्यद्विकारजातंकटकमुकुटकेदिविज्ञातंस्याद्वाचारंभणमित्या
दिसमानंयथाचसोम्यैकेननखनिकृंतनेनोपलक्षितेनकार्ष्णायसपिंडेनेत्यर्थः।सर्वंका
र्ष्णायसंकार्ष्णायसविकारजातंविज्ञातंस्यात्समानमन्यदनेकदृष्टांतोपादानंकादार्ष्टां
तिकानेकभेदानुगमार्थंदृढप्रतीत्यर्थंचएवसोम्यसआदेशोयोमयोक्तोभवतीत्यु

भवतिपितयहितरोनवैनूनंभगवंतःपूज्यावंतोगुरवोममयेतएतद्यदुक्तंव
स्तुनावेदिषुर्नविज्ञातवंतोनूनंयद्यदित्यवेदिष्यन्विदितवंतःएतद्वस्तुकथंमेगुणव
तेभक्तायानुगतायनावक्ष्यन्नोक्तवंतस्तेनाहंमन्येनविदितवंतइत्यवाच्यमपिगुरो
र्निन्दनमवादीत्पुनर्गुरुकुलंप्रतिप्रेषणभयादतोभगवांस्त्वेवमेमह्यंतद्वस्तुय
न्सर्वज्ञत्वंज्ञातेनमेऽस्यात्तद्ब्रवीतुकथयत्वित्युक्तःपितोवाचतथास्तुसोम्येति॥१॥
सदेवसदित्यस्तितामात्रंवस्तुसूक्ष्मंनिर्विशेषंसर्वगतमेकंनिरंजनंनित्यंनिरवय
वंविज्ञानंयदवगम्यतेसर्ववेदांतेभ्यःएवशब्दोवधारणार्थःकिंतदवधियतइत्या
हइदंजगन्नामरूपक्रियावद्विकृतमुपलभ्यतेयत्तत्सदेवासीदित्यासीदिति शब्देनसंब
ध्यते।कदासदेवेदमासीदित्युच्यते॥अग्रेजगतःप्रागुत्पत्तेः॥किंनेदानीमिदंसद्ये
नाग्रआसीदितिविशेष्यते॥कथंतर्हिविशेषणं॥इदानीमपीदंसदेवकिंतुनामरूप
विशेषणवदिदंशब्दबुद्धिविषयंचेतीदंचभवति॥प्रागुत्पत्तेस्त्वग्रेकेवलसच्छब्दबु
द्धिमात्रगम्यमेवेतिसदेवेदमग्रआसीदित्यवधार्यते।नहिप्रागुत्पत्तेर्नामवद्रूपव

द्वेदमितिग्रहीतुंशक्यंवस्तुसुषुप्तकालेइवयथासुषुप्तादुत्थितःसत्त्वमात्रमवगच्छति
सुषुप्तेसन्मात्रमेवकेवलंवस्त्वितितथाप्रागुत्पत्तेरित्यभिप्रायोयथेदमुच्यतेलोके
पूर्वाह्णेघटादिसिसृक्षुणाकुलालेनमृत्पिंडंप्रसारितमुपलभ्यग्रामांतरंगत्वाप्रत्या
गतोऽपराह्णेतत्रैवघटशरावाद्यनेकभेदभिन्नंकार्यमुपलभ्यमृदेवेदंघटशरावादिके
वलंपूर्वाह्णआसीदितितथेहाप्युच्यतेसदेवेदमग्रआसीदिति॥एकमेवेतिःस्वकार्य
पतितमन्यंनास्तीत्येकमेवेत्युच्यते॥अद्वितीयमितिमृद्व्यतिरेकेणमृदोयथान्यद्घ
टाद्याकारेणपरिणमयितृकुलालादिनिमित्तकारणंदृष्टं॥तथासद्व्यतिरेकेणसतः
सहकारिकारणंद्वितीयंवस्त्वंतरंप्राप्तंप्रतिषिध्यतेऽद्वितीयमितिनास्यद्वितीयंवस्त्वं
तरंविद्यतइत्यद्वितीयं।ननुवैशेषिकपक्षेपिसत्सामानाधिकरण्यंसर्वस्योपपद्यते
द्रव्यगुणादिसच्छब्दबुद्ध्यनुवृत्तेःसद्द्रव्यंसद्गुणःसत्कर्मेत्यादिदर्शनात्सत्यमेवंस्यादि
दानींप्रागुत्पत्तेस्तुनैवेदंकार्यंसदेवासीदित्यभ्युपगम्यतेवैशेषिकैःप्रागुत्पत्तेःकार्य
स्यासत्त्वाभ्युपगमान्नचैकमेवसदद्वितीयंप्रागुत्पत्तेरिच्छंतितस्माद्वैशेषिकपरिक

स्पिताऽसतोऽन्यत्कारणमिदंसमुदुच्यते।मृदादिदृष्टान्तेभ्यस्तत्रहैतस्मिन्प्रागुत्पत्तेर्वस्तुनिरूपणे
एकेवैनाशिकाआहुर्वस्तुनिरूपयंतोऽसत्सद्भावमात्रंप्रागुत्पत्तेरिदंजगदेकमेवाद्वि
तीयमासीदिति।सदभावमात्रंहिप्रागुत्पत्तेस्तत्त्वंकल्पयंतिबौद्धाः॥नतुसत्प्रतिस्पर्द्धिव
स्त्वंतरमिच्छंति॥यथासच्चासदितिगृह्यमाणंयथाभूतमविपरीतंतत्त्वंभवतीतिनैयायि
काः॥ननुसद्भावमात्रंप्रागुत्पत्तेश्चेदभिप्रेतंवैनाशिकैः॥कथंप्रागुत्पत्तेरिदमासीदस
देकमेवाद्वितीयंचेतिकालसंबंधःसंख्यासंबंधोऽद्वितीयत्वंचोच्यतेतैर्बौद्धैः॥नयुक्तंते
षांभावाभावमात्रमभ्युपगच्छतामसत्त्वमात्राभ्युपगमोप्ययुक्तएवाभ्युपगंतुरनभ्यु
पगमानुपपत्तेरिदानीमभ्युपगंताभ्युपगम्यतेनप्रागुत्पत्तेरितिचेन्नप्रागुत्पत्तेःसद्भा
वस्यप्रमाणाभावात्प्रागुत्पत्तेरसदेवेतिकल्पनानुपपत्तिः॥कथंवस्त्वाकृतेःशब्दार्थत्वेस
देकमेवाद्वितीयमितिपदार्थवाक्यार्थोपपत्तिस्तदनुपपत्तौचेदंवाक्यमप्रमाणंप्रसज्ये
तेतिचेन्नैषदोषः॥सद्ग्रहणनिवृत्तिपरत्वाद्वाक्यस्यासदित्ययंतावच्छब्दःसदाकृतिवाचकए
कमेवाद्वितीयमित्येतौचसच्छब्देनसमानाधिकरणौतथेदमासीदितिचतत्रनञ्सद्वाक्ये

प्रयुक्तःसद्वाक्यमेवावलंब्यसद्वाक्यमर्थविषयांबुद्धिंसदेकमेवाद्वितीयमिदमासीदि
त्येवंलक्षणांततःसद्वाक्यार्थान्निवर्त्तयत्यश्वारूढइवाश्वारंश्वालंबनोश्वंतदभिमुखविष
यान्निवर्त्तयतितद्वत्।ननुपुनःसद्भावमेवाभिधत्तेतःपुरुषस्यविपरीतग्रहणनिवृत्त्यर्थ
परमिदमसदेवेत्यादिवाक्यंप्रयुज्यतेदर्शयित्वाहिविपरीतग्रहणंततोनिवर्त्तयितुंशक्य
तइत्यर्थवत्त्वादसदादिवाक्यस्यप्रोतत्वंप्रामाण्यंचसिद्धमित्यदोषः॥ततस्मादसतःस
र्वाभावरूपात्सद्विद्यमानमजायतसमुत्पन्नमंडभावच्छांदसः॥तदेतद्विपरीतग्रहणंम
हावैनाशिकपक्षंदर्शयित्वाप्रतिषेधतिकुतस्तुप्रमाणात्खलुहेसोम्यैवंस्यादसतःस
जायेतेत्येवंकुतोनवेत्यकुतश्चित्प्रमाणादेवंसंभवतीत्यर्थः॥दपिबीजोपिमर्देंकुरो
जायमानोदृष्टोऽभावादेवेति॥तदप्यभ्युपगमविरुद्धंतेषांकथंयेतावद्बीजावयवाबीजसं
स्थानविशिष्टास्तेंकुरेप्यनुवर्त्ततएवनतेषामुपमर्दोंकुरजन्मनि॥यत्पुनर्बीजाकारसंस्था
नंतद्बीजावयवव्यतिरेकेणवस्तुभूतंनवैनाशिकैरभ्युपगम्यतेयदंकुरजन्मन्युपमृद्यते
थतदस्त्यवयवव्यतिरिक्तवस्तुभूतंतथाचसत्यभ्युपगमविरोधोथसंवृत्यास्तु॥पगतंबीज

संस्थानरूपमुपमृद्यत इतिचेत्॥ केयंसंस्थाननिवृत्तिर्नामकिमभावउतभावइतियद्यभावो
दृष्टांतानावोथभावस्तथापिनाभावादंकुरोत्पत्तिर्बीजावयवेभ्योह्यंकुरोत्पत्तिरवयवाश्चापु
पमृद्यंतेचेन्नतदवयवेष्वनुत्पत्त्वाद्यथावैनाशिकानांबीजसंस्थानरूपावयवीनास्ति
तथावयवाश्चयातितेषामप्युपमर्दानुपपत्तिर्बीजावयवानामपिसूक्ष्मावयवास्त
दवयवानामप्यन्त्योसूक्ष्मतराश्चावयवाइत्येवंप्रसंगस्यानिर्वृत्तेःसर्वत्रोपमर्दानुपप
त्तिः॥सद्बुद्ध्यनुवृत्तेःसत्वानिवृत्तिश्चेतिसदादीनांततएवमसदुत्पत्तिःसेत्स्यतिनत्वस
दादीनांदृष्टांतोस्त्यसतःसदुत्पत्तेःमृत्पिंडाद्घटोत्पत्तिर्दृश्यतेसदादीनांतदभावेभा
वात्तदभावेचाभावाद्यद्यभावादेवघटउत्पद्यतेघटार्थिनामृत्पिंडोनोपादीयेताभावा
शद्बुद्ध्यनुत्पत्तिश्चघटादौप्रसज्येत।नत्वेतदस्त्यतोनासतःसदुत्पत्तिर्यदप्याहुःमृद्बुद्धि
र्घटबुद्धेर्निमित्तमितिमृद्बुद्धिर्घटबुद्धेःकारणमुच्यतेनतुपरमार्थतएवमृद्घटोवास्ती
तितथापिमृद्बुद्धिर्विद्यमानाविद्यमानायाएवघटबुद्धेःकारणमितिनासतःसदुत्पत्ति
र्मृद्घटबुद्ध्योर्निमित्तनैमित्तिकतयानंतरमात्रंनतुकार्यकारणत्वमितिचेन्नबुद्धीनां

नैरंतर्येगम्यमानोवैनाशिकानांबहिर्दृष्टांताभावात्।कुतस्तुखलुसोम्यैवंस्यादि
तिहोवाचकथंकेनप्रकारेणासतःसज्जायेतेत्यसतःसदुत्पत्तौनकश्चिदपिदृष्टां
तप्रकारोस्तीत्यभिप्रायः॥एवमसदादिपक्षमुन्मथ्योपसंहरतिसत्त्वेवसोम्येदमग्र
आसीदितिस्वपक्षसिद्धं॥ननुसदादिनोपिसतःसदुत्पद्यतइतिनैवदृष्टांतोस्तिघटा
द्घटांतरोत्पत्त्यदर्शनात्सत्यमेवं॥नासतःसदंतरमुत्पद्यतेकिंतर्हिसदेवसंस्थानां
तरेणावतिष्ठते॥यथासर्पःकुंडलीभवतीयथाचमृच्चूर्णपिंडघटकपालादिप्रका
रैर्यद्येवंसदेवसर्वप्रकारावस्थंकथंप्रागुत्पत्तेरिदमासीदित्युच्यते॥ननुनश्रुतंत्वया
सदेवेत्यवधारणमिदंशब्दवाच्यमिदानीमिदंजातमिति॥न॥सतएवेदंशब्दबुद्धि
विषयतयावस्थानाद्यथामृदेवपिंडघटादिशब्दबुद्धिविषयत्वेनावतिष्ठते॥तद्वन्न
नुयथामृद्वस्त्वेवंपिंडघटाद्यपितद्वत्सबुद्धिरन्यबुद्धिविषयत्वात्कार्यस्यसतोन्यद्व
स्त्वंतरंस्यात्कार्यजातंयथाश्वाद्गौःनपिंडघटादीनामितरेतरव्यभिचारेपिमृत्त्वाव्य
भिचाराद्यद्यपिघटःपिंडंव्यभिचरतिपिंडश्चघटं॥तथापिपिंडघटौमृत्त्वंनव्यभिचर

नत्तस्मान्मृन्मात्रपिंडघटोव्यभिचरतित्वंगौरश्वोवागांतस्मान्मृदादिसंस्थानमात्रं।
घटादयएवंसंस्थानमात्रमिदंसर्वमितियुक्तंप्रागुत्पत्तेःसदेवेतिवाचारंभणमा
त्रत्वाद्विकारसंस्थानस्यनतुनिरवयवंसन्निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनंस
बाह्याभ्यंतरोह्यजइत्यादिश्रुतिभ्योनिरवयवस्यकथंविकारसंस्थानमुपपद्यते।नै
षदोषोरज्ज्वाद्यवयवेभ्यःसर्पादिसंस्थानवद्बुद्धिपरिकल्पितेभ्यःसदवयवेभ्योवि
कारसंस्थानोपपत्तेर्वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमेवंसदेवसत्य
मितिश्रुतेरेकमेवाद्वितीयंपरमार्थतइदंबुद्धिकालेपिसदैकस्तेद्रांदर्शनेद्वैतवद्
तश्चनप्रधानंसांख्यपरिकल्पितंजगत्कारणंप्रधानस्यचेतनत्वानभ्युपगमात्॥इदं
तुसच्चेतनमीक्षितृत्वात्कथमैक्षततेत्याह॥बहुप्रचुरंस्यांभवेयंप्रजायेयप्रकर्षेणो
त्पद्येतययथामृद्घटाद्याकारेणयथावारज्ज्वादिसर्पाद्याकारेणबुद्धिपरिकल्पिते
नासदेवतद्दिसर्वंयदृश्यतेयरज्जुरिवसर्पाद्याकारेणसतएवद्वैतभेदेनान्यथा
गृह्यमाणत्वान्नासत्त्वं॥कस्यचिदितिब्रूमोयथासतोन्यद्वस्त्वंतरंपरिकल्प्यपुनस्त

स्यैवप्रागुत्पत्तेःप्रध्वंसाच्चोर्ध्वमसत्त्वंब्रुवतेतार्किकाः॥नतथास्माभिःकदाचिदपिसतो
न्यदभिधानमभिधेयंवावस्तुपरिकल्प्यतेसदेवतुसर्वमभिधानमभिधीयतेचयदन्य
बुद्ध्यापियथारज्जुरेवसर्पबुद्ध्यासर्पइत्यभिधीयतेयथावापिंडघटादिमृदोन्यबुद्ध्यापिपिं
डघटादिशब्देनाभिधीयतेलोकेरज्जुविवेकदर्शिनांतुसर्पाभिधानबुद्धीनिवर्त्तेते॥यथा
मृद्विवेकदर्शिनांघटादिशब्दबुद्धीतद्वत्सद्विवेकदर्शनामन्यद्विकारशब्दबुद्धीनिवर्त्तेते
यतोवाचोनिवर्त्तंतेअप्राप्यमनसासहअनिरुक्तेनिलयनेइत्यादिश्रुतिभ्यःएवमीक्षित्वा
तत्तेजोसृजततेजःसृष्टवत्॥ननुतस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिश्रुत्यंत
रेआकाशाद्वायुस्ततस्तृतीयंतेजःश्रुतमिहकथंप्राथम्येनतस्मादेवतेजःसृज्यतेतत्तए
वचाकाशमितिविरुद्धं॥नैषदोषोआकाशवायुसर्गानंतरंतत्सत्तेजोसृजतेतिकल्पनो
पपत्तेरथवाविवक्षितइहसृष्टिक्रमःसत्कार्यमिदंसर्वमतःसदेकमेवाद्वितीयमित्येत
द्विवक्षितंमृदादिदृष्टांतात्॥अथवात्रिवृत्करणस्यविवक्षितत्वात्तेजोबन्नानामेवसृष्टि
माचष्टे॥तेजइतिप्रसिद्धंलोकेदग्धृपक्तृप्रकाशकंरोहितंचेतितत्सत्सृष्टंतेजःएक्षतते

जोरूपसंस्थितंसदैक्षततत्पथेबहुस्यांप्रजायेयेतितदपोऽसृजतआपोद्रवाःस्निग्धाः
स्यंदिन्यःशुक्लाश्चेतिप्रसिद्धालोके॥यस्मात्तेजःकार्यभूताआपःतस्माद्यत्रक्वचदेशेका
लेवाशोचतिस्वेदतेवाप्रस्विद्यतेवापुरुषस्तेजसएवतत्तदापोऽधिजायंतेतआ
पएकंतत्सर्वंचदेवाबाकारसंस्थितंसादैक्षतेत्यर्थोबह्व्यःस्यामप्रभूताअन्नंवेमप्रजायेम
ह्युत्पद्येमहीतिताअन्नमसृजंतपृथिवीलक्षणंपार्थिवंह्यन्नंयस्मादकार्यमन्नंतस्मा
द्यत्रक्वचवर्षतिदेशेतत्रैवभूयिष्ठंप्रभूतमन्नंभवत्यद्भ्यएवतदन्नाद्यमधिजाय
तेताअन्नमसृजंतेतिपृथिव्युक्तासर्वमिदंतुदृष्टांतेऽन्नंचतदाद्यंचेतिविशेषणाद्व्रीहि
यवाद्युच्यंतेऽन्नंचगुरुस्थिरंधारणंकृष्णंचरूपतःप्रसिद्धं॥ननुतेजःप्रभृतिष्वीक्षणंन
गम्यतेहिंसादिप्रतिषेधाभावात्त्रासादिकार्यानुपलंभाच्चतत्रकथंतत्तेजऐक्षतेत्या
दिनेषदोषएकेक्षितृकारणपरिणामत्वात्तेजःप्रभृतीनांमतएवेक्षितृनियतक्रमविशि
ष्टकार्योत्पादकत्वाच्चतेजःप्रभृतीक्षतइवेक्षतइत्युच्यतेभूतंनतुमतोऽप्युपचरितमेव
क्षितृत्वं॥न॥सदीक्षणस्यकेवलशब्दगम्यत्वात्तन्मात्रावरामुपचरितुंकल्पयितुंतेजःप्रभृ

तीनामनुमीयतईक्षणाभावइतियुक्तमुपचरितंकल्पयितुं॥ननुसतोऽपिमहदादिकार
णत्वादचेतनत्वंशक्यमनुमातुंअतःप्रधानस्यैवाचेतनस्यसतश्चेतनार्थत्वान्नियत
कालक्रमविशिष्टकार्योत्पादकत्वाच्चेक्षतइवेक्षतइतिशक्यमनुमातुमुपचरितमी
क्षणं॥दृष्टश्चलोकेऽचेतनेचेतनावदुपचारोयथाकूलंपिपतिषतीतितद्वत्सतोऽपि
स्यात्॥न॥तत्सत्यंसआत्मेतितस्मिन्नात्मोपदेशात्तस्मिन्नात्मोपदेशोऽप्युपचरितइति
चेत्॥यथाममात्माभद्रसेनइतिसर्वार्थकारिण्यनात्मन्यात्मोपचारःस्यात्तद्वत्सदस्मी
तिसत्याभिसंधस्यतस्यतावदेवचिरमितिमोक्षोपदेशात्सोऽप्युपचरतिचेत्प्रधानात्मा
भिसंबंधत्वात्मोक्षसामीप्यंवर्ततइतिमोक्षोपदेशोऽप्युपचरितएवयथालोकेग्रामंगं
तुंप्रस्थितःप्राप्तवानहंग्राममितिब्रूयात्त्वरापेक्षयातद्वन्नयेनविज्ञातेनाविज्ञातंवि
ज्ञातंभवतीत्युपक्रमात्सत्येकस्मिन्विज्ञातेसर्वंविज्ञातंभवतितदनन्यत्वाच्चसर्वस्या
द्वितीयत्वाच्चनचान्यद्विज्ञातव्यमवशिष्टंश्रावितंश्रुत्यानुमेयंवालिंगतोऽस्तियेन
मोक्षोपदेशउपचरितःस्यात्सर्वस्यचप्रपंचकार्थस्योपचरितत्वकल्पनायांतथाश्र

मःपरिकल्प्यःस्यात्पुरुषार्थसाधनस्यतत्कर्मणोवाधिगतत्वान्नस्यादेवप्रामाण्यान्नयु
क्तःश्रुतार्थपरित्यागोतश्चेतनावत्कारणंजगतइतिसिद्धं॥२॥तेषांजीवाविष्टानांखल्वे
षांपक्ष्यादीनांभूतानामेषामितिप्रत्यक्षनिर्देशान्ननुतेजःप्रभृतयस्तेषांत्रिवृत्कस्मा
त्तेषांखल्वेषांभूतानांपक्षिपशुस्थावरादीनांकारणस्यवक्ष्यमाणत्वात्असतित्रिवृत्क
रणेप्रत्यक्षनिर्देशानुपपत्तिर्देवताशब्दप्रयोगाच्चतेजःप्रभृतिषुइमास्तिस्रोदेवताइ
तितस्मात्तेषांखल्वेषांभूतानांपक्षिपशुस्थावरादीनांत्रीण्येवनातिरिक्तानिबीजानि
कारणानिभवंतिकानितानीत्युच्यंते॥अंडजमेवांडजंपक्ष्यादि॥पक्षिसर्पादिभ्योपक्षि
सर्पादयोजायमानादृश्यंतेतेनपक्षीपक्षिणांबीजंसर्पःसर्पाणांतथान्यदप्यंडाज्जा
तंतज्जातीयानांबीजमित्यर्थोनन्वंडाज्जातमंडजमुच्यतेंऽतोडमेवबीजमितियुक्तं॥
कथमंडजंबीजमित्युच्यते॥सत्यमेवंस्याद्यदित्वदिच्छातंत्राश्रुतिःस्यात्स्वतंत्रातुश्रुति
र्यतआहांडज्येवजात्येवबीजंनांडादीनिदृश्यतेचांडजाद्यभावेतज्जातीयसंतत्यभा
वोनांडाद्यभावे॥अतोंडजादीन्येवबीजान्यंडजादीनांतथाजीवाज्जातंजीवजंजरायु

जमित्येतत्पुरुषपश्वादिउद्भिज्जमुद्भिनत्तीत्युद्भित्स्थावरंततोजातमुद्भिज्जं॥धानावोद्भि
तोजायतइतिवोद्भिज्जंस्थावरबीजंस्थावराणांबीजमित्यर्थः॥स्वेदजसंशोकजयोरंड
जोद्भिज्जयोरेवयथासंभवमंतर्भावएवद्रष्टव्यअवधारणंत्रीण्येवबीजानीत्युपपन्नंभवति
सेयंप्रागुक्तामदाख्यातेजोबन्नयोनिर्देवतोक्तेक्षितवतायथाहंबहुस्यामि
तितद्देवबहुभवनंप्रयोजनंनाद्यापिनिमित्तमित्यतईक्षांचक्रेपुनःहंतःवताबहुभवन
मेवप्रयोजनमुररीकृत्यकथमेइतेदानीमहमिमायौयथोक्तास्तेजआद्यास्तिस्रोदेव
ताअनेकजीवेनेतिस्वबुद्धिस्थंसर्वस्यसृष्टमनुस्मृतप्राणधारणमात्मानमेवस्मरंत्याहानेन
नजीवेनात्मनेतिप्राणधारणकर्त्रात्मनेतिवचनात्स्वात्मनोव्यतिरिक्तेनचैतन्यस्वरू
तयाविशिष्टेनेत्येतद्दर्शयित्यनुप्रविश्यतेजोबन्नभूतमात्रासंसर्गेणलब्धविशेषविज्ञा
नामचरूपंचनामरूपेव्याकरवाणिविस्पष्टमाकरवाणिअसौनामायमिदंरूपइतिव्या
कुर्यामित्यर्थोननुनयुक्तमिदमसंसारिण्याःसर्वज्ञायादेवतायाबुद्धिपूर्वकमनेकशत
सहस्रानर्थाश्रयंदेहमनुप्रविश्यदुःखमनुभविष्यामीतिसंकल्पनमनुप्रवेशश्चातंत्र्ये

सतिसत्यमेवंनयुक्तंस्याद्यदिस्वेनैवाविकृतेनरूपेणानुप्रविश्याहंदुःखमनुभवेयमि
तिसंकल्पितवतीनत्वेवंकथंतर्ह्यनेनजीवेनात्मनानुप्रविश्येतिवचनाज्जीवोहिना
मदेवतायाआभासमात्रंबुद्ध्यादिभूतमात्रासंसर्गजनितआदर्शमिवप्रविष्टःपुरुष
प्रतिबिंबोजलादिष्विवचसूर्यादीनामचिंत्यानंतशक्तिमत्यादेवतायाबुद्ध्यादिसंबंध
श्चैतन्याभासोदेवतास्वरूपविवेकाग्रहणनिमित्तःसुखीदुःखीमूढइत्याद्यनेकवि
कल्पप्रत्ययश्छायामात्रेणजीवरूपेणानुप्रविष्टत्वाद्देवतानदैहिकैःस्वतःसु
खदुःखादिभिःसंबध्यतेयथापुरुषादित्यादयआदर्शोदकादिषुछायामात्रेणानुप्र
विष्टाआदर्शोदकादिदोषैर्नसंबध्यंतेतद्वद्देवतापिसूर्योयथासर्वलोकस्यचक्षुर्न
लिप्यतेचाक्षुषैर्बाह्यदोषैरेकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यआका
शवत्सर्वगतश्चनित्यइतिहिकाठके॥ध्यायतीवलेलायतीवेतिचवाजसनेयके॥ननु
छायामात्रश्चेज्जीवोमृषैवप्राप्तस्तथापरलोकेहलोकादिचतस्यनैषदोषः॥सदात्मना
सत्यत्वाभ्युपगमात्सर्वंचनामरूपादिसदात्मनैवसत्यंविकारजातंस्वतस्त्वनृतमेववा

चारंभणंविकाराणांचसत्यत्वंसतोन्यत्वेचानृतत्वमितिनकश्चिद्दोषस्तार्किकैरिहा
नुषक्तुंशक्योयथेतरेतरविरुद्धाद्वैतवादाःस्वबुद्धिविकल्पमात्राअतत्त्वनिष्ठाइतिश
क्यवक्तुंसैवंतिस्रोदेवताअनुप्रविश्यस्वात्मावस्थेबीजभूतेअव्याकृतेनामरूपेव्याक
रवाणीतीक्षितासांचतिसृणांदेवतानामेकैकांत्रिवृतंत्रिवृतंकरवाण्येकैकस्यास्त्रि
वृत्करणमित्येवंहितेजोबन्नानांपृथग्नामप्रत्ययलाभःस्यात्तेजइदमिमाआपोन्नमि
दमितिच॥सतिचपृथग्नामप्रत्ययलाभेदेवतानांसंव्यवहारप्रसिद्धिःप्रयोजनंस्यादे
वमीक्षित्वासेयंदेवतेमास्तिस्रोदेवतेमास्तिस्रोदेवताअनेनैवयथोक्तेनैवजीवेनसू
र्यबिंबवदंतःप्रविश्यवैराजंपिंडंप्रथमंदेवादीनांचपिंडाननुप्रविश्ययथासंकल्पमे
वनामरूपेव्याकरोदसौनामायमिदंरूपइतितासांचदेवतानांगुणप्रधानभावेनत्रि
वृतंत्रिवृतमेकैकामकरोत्कृतवतीदेवतातिष्ठतुतावद्देवतादिपिंडानांनामरूपाभ्यां
व्याकृतानांतेजोबन्नमयत्वेनत्रिधात्वंयथातुबहिरिमाःपिंडेभ्यस्तिस्रोदेवतास्त्रिवृत्त्रि
वृदेकैकाभवतितन्मेममनिगदतोविजानीहिविस्पष्टमवधारयोदाहरणतः॥३॥३॥

यत्तु देवतानांत्रिवृत्करणमुक्तंतस्यैवोदाहरणमुच्यतउदाहरणंनामैकदेशप्र
सिद्ध्याऽशेषप्रसिध्यर्थमुदाह्रियतइतितदेतदाह॥यदग्नेस्त्रिवृत्कृतस्यरोहितंरूपंप्र
सिद्धंलोकेतदत्रिवृत्कृतस्यतेजसोरूपमितिविद्धितथायच्छुक्लंरूपमग्नेरेवतदपां
त्रिवृत्कृतानांयत्कृष्णंतस्यैवाग्नेरूपंतदन्नस्यपृथिव्यास्त्रिवृत्कृतायाइतिविद्धितत्रै
वंरूपत्रयव्यतिरेकेणाग्निरितियन्मन्यसेत्वंतस्याग्नेरग्नित्वमिदानीमपागादपगतं
प्राग्रूपत्रयविवेकविज्ञानाद्याग्निबुद्धिरासीत्तेसाग्निबुद्धिरपगताग्निशब्दश्चेत्यर्थोयथा
दृश्यमानरक्तोपधानसंयुक्तःस्फुटिकोगृह्यमाणःपद्मरागोयमितिशब्दबुध्योःप्रयो
जकोभवतिप्रधानस्फुटिकयोर्विवेकविज्ञानात्तद्विवेकविज्ञानेतुपद्मरागशब्दबुद्धी
निवर्तेतेतद्विवेकविज्ञातुस्तद्वन्ननुकिमत्रबुद्धिशब्दकल्पनयाक्रियते॥प्राग्रूपत्रय
विवेककरणादग्निरेवासीत्तदग्नेरग्नित्वंरोहितादिरूपविवेककरणादपागादितियु
क्तंयथातंत्वपकर्षणेपटाभावोनैवं॥बुद्धिशब्दमात्रमेवह्यग्निरितियतआह॥वाचारंभणम
ग्निर्नामविकारोनामधेयंनाममात्रमित्यर्थोतोग्निबुद्धिरितिमृषैव॥किंतर्हितत्रसत्यं

त्रीणिरूपाणीत्येवसत्यंनाणुमात्रमपिरूपत्रयव्यतिरेकेणसत्यमस्तीत्यवधारणा
र्थस्तथायदादित्यस्ययच्चंद्रमसोयद्विद्युतसमानं॥ननुखलुयथाग्नौसोम्येमास्तिस्रो
देवतास्त्रिवृत्त्रिवृदेकैकातन्मेविज्ञानीहीत्युक्तातेजसएववचउनिरिष्फदाहरणैरग्न्यादि
ष्विवृत्करणंप्रदर्शितं॥नावन्नयोरुदाहरणंदर्शितंत्रिवृत्करणेनैषदोषः॥अवन्नवि
षयाण्यप्युदाहरणान्येवमेवचदृष्टव्यानीतिमन्यते॥तेजसउदाहरणमुपलक्षणार्थं
रूपवत्वात्विस्पष्टार्थत्वोपपत्तेश्चगंधरसयोरनुदाहरणंत्रयाणामसंभवान्नहिगंधर
सौतेजसिस्तःस्पर्शशब्दयोरनुदाहरणंविभागेनदर्शयितुमशक्यत्वाद्यदिसर्वंजगत्त्रि
वृत्कृतमित्यग्न्यादिवत्त्रीणिरूपाणीत्येवसत्यमग्नेरग्नित्ववदपागाज्जगतोजगत्वं।त
थान्नस्याप्यप्शुंगत्वादापइत्येवसत्यं॥वाचारंभणमात्रमन्नं॥तथापामपितेजःशुंगत्वा
द्वाचारंभणत्वंतेजइत्येवसत्यं॥तेजसोपिसच्छुंगत्वाद्वाचारंभणत्वं॥सदित्येवसत्यमि
त्येषोर्थोविवक्षितोननुवाय्वंतरिक्षेत्वत्रिवृत्कृतेतेजःप्रभृतिष्वनंतर्भूतत्वादवशिष्येते॥
एवंगंधरसशब्दस्पर्शाश्चेतिकथंसताविज्ञातेनसर्वमन्यदविज्ञातं॥विज्ञातंभवेत्तद्भि

नैवाप्रकारांतरं।वाच्यंनैषदोषोरूपवद्द्रव्येसर्वस्यदर्शनात्कथंतेजसितावद्रूपवति
शब्दस्पर्शयोरप्युपलंभाद्वाय्वंतरिक्षयोस्तत्रस्पर्शशब्दगुणवतोःसद्भावोनुमीयते॥तथा
अबन्नयोरूपवतोरसगंधांतर्भावइतिरूपवतांत्रयाणांतेजोबन्नानांत्रिवृत्करणप्रदर्श
नेनसर्वंतदंतर्भूतंसद्विकारत्वात्त्रीण्येवरूपाणिविज्ञातंमन्यतेश्रुतिर्नहिमूर्त्तंरूप
वद्द्रव्यंप्रत्याख्यायवाय्वाकाशयोस्तद्गुणयोर्गंधरसयोर्वाग्रहणमथवारूपवतामपि
त्रिवृत्करणंप्रदर्शनार्थमेवमन्यतेश्रुतिर्यथात्रिवृत्कृतेत्रीणिरूपाणीत्येवसत्यं।तथा
पंचीकरणेपिसमानोन्यायइत्यतःसर्वस्यसद्विकारत्वात्सताविज्ञातेनसर्वमिदंवि
ज्ञातंस्यात्सदेकमेवाद्वितीयंसत्यमितिसिद्धमेवभवति॥तदेतदेकस्मिन्सतिविज्ञा
तेसर्वमिदंविज्ञातंभवति।तत्सदेकमेवाद्विद्वांसोविदितवंतःपूर्वेतिक्रांतामहाशाला
महाश्रोत्रियाआहुःस्मवैकिलकिमुक्तवंतइत्याह॥ततोस्माकंकुलेइदानींयथो
क्तविज्ञानवतांकश्चनकश्चिदप्यश्रुतममतमविज्ञातमुदाहरिष्यतिसर्वंविज्ञात
मेवास्मत्कुलीनानांसद्विज्ञानवत्त्वादित्यभिप्रायस्तेपुनःकथंसर्वंविज्ञातवंतइत्याह

यत्त्रिभ्योरोहितादिरूपेभ्यस्त्रिवृत्कृतेभ्योविज्ञातेभ्यःसर्वमप्यन्यच्छिष्टमेवमेवेतिविदां
चक्रुर्विज्ञातवंतोयस्मात्तस्मात्सर्वज्ञाएवसद्विज्ञानात्तेआसुरित्यर्थोयथैवेभ्योविदांचक्रु
रिंद्राग्न्यादिभ्योदृष्टांतेभ्योविज्ञातेभ्यःसर्वमन्यद्विदांचक्रुरित्येतत्कथंयदन्यद्रूपेणसं
दिह्यमानेचकपोतादिरूपेरोहितमिवयद्गृह्यमाणमभूत्तेषांपूर्वेषांब्रह्मविदांतत्तेज
सोरूपमितिविदांचक्रुस्तथायच्छुक्लमिवाभूद्गृह्यमाणंतदपांरूपंयत्कृष्णमिवगृह्यमाणं
देवतानांसमासःसमुदायइतिविदांचक्रुरेवंतावद्बाह्यंवस्त्वग्न्यादिवद्विज्ञातं
थेदानींयथानुखलुइमाःसोम्यमायथोक्तास्तिस्रोदेवताःपुरुषंशिरःपाण्यादिलक्षणं
कार्यकारणसंघातंप्राप्यपुरुषेणोपयुज्यमानास्त्रिवृत्त्रिवृदेकैकाभवतितन्मेविजा
नीहिनिगदतइत्युक्त्वाह॥४॥अन्नमशितंभुक्तंत्रेधाविधीयतेजाठरेणाग्निनापच्य
मानंत्रेधाविभज्यतेकथंतस्यान्नस्यत्रिधाविधीयमानस्ययःस्थविष्ठःस्थूलतमोधातुःस्थूल
तमं॥वस्तुविभक्तस्यस्थूलांशस्तत्पुरीषंभवतियोमध्यमोंशोधातुरन्नस्यतद्रसादिक्रमे
णपरिणम्यमांसंभवतियोणिष्ठोणुतमोधातुःसऊर्ध्वंहृदयंप्राप्यसूक्ष्मासुहितासुनाडीषु

नुप्रविश्यवागादिकरणसंघातस्यस्थितिमुत्पादयन्मनोभवतिमनोरूपेणविप
रिणमन्मनसउपचयंकरोतितस्मादन्नोपचितत्वान्मनसोभौतिकत्वमेवनवै
शेषिकतंत्रोक्तलक्षणंनित्यंनिरवयवंचेतिगृह्यते॥यदपिमनोदैवंचक्षुरितिव
क्ष्यतितदपिननित्यत्वापेक्षया।किंतर्हिसूक्ष्मव्यवहितविप्रकृष्टादिसर्वेंद्रियविष
यव्यापकत्वापेक्षयाचान्येंद्रियापेक्षयानित्यत्वंतदथापेक्षिकमेवेतिवक्ष्यामः॥
सदेकमेवाद्वितीयमितिश्रुतेः॥तथापःपीतास्त्रेधाविधीयंतेतासांयःस्थविष्ठोधातु
स्तन्मूत्रंभवतियोमध्यमस्तत्रैषांलोहितंभवतियोणिष्ठःसप्राणोभवतिवक्ष्यति
त्यापोमयःप्राणोनपिबतोविच्छेत्स्यतइति॥तथातेजोशितंतैलघृतादिभक्षितंत्रेधा
विधीयतेतस्ययःस्थविष्ठोधातुस्तदस्थिभवतियोमध्यमःसमज्जास्थ्यंतर्गतस्नेहोयो
णिष्ठःसावाक्तैलघृतादिभक्षणाद्धिवाग्विशदाभाषणेसमर्थाभवतीतिप्रसिद्धंलो
केयतएवमन्नमयंहिसोम्यमनआपोमयःप्राणस्तेजोमयीवाक्ननुकेवलान्नभक्षि
णआखुप्रभृतयोवाग्मिनःप्राणवंतश्चतथाब्मात्रभक्षाःसामुद्रामीनमकरप्रभृतयो

मनस्विनोवाग्मिनश्चतथास्नेहपानामपिप्राणवत्त्वंमनस्वित्वंचानुमेयंयदिसंतित
त्रकथमन्नमयंहिसोम्यमनःआपोमयःप्राणस्तेजोवाक्ननुकेवलान्नभक्षिणआ
खुप्रभृतयोवाग्मिनःप्राणवंतश्चतथाइत्याद्युच्यते॥नैषदोषः॥सर्वस्यत्रिवृत्कृतत्वात्स
र्वत्रसर्वोपपत्तेर्नह्यत्रिवृत्कृतमन्नमश्नातिकश्चिदापोवात्रिवृत्कृताःपीयंतेतेजोवा
त्रिवृत्कृतमश्नातिकश्चिदित्यन्नादानामाखुप्रभृतीनांवाग्मित्वंप्राणवत्त्वंचेत्याद्यवि
रुद्धमित्येवंप्रत्यायितःश्वेतकेतुराह॥भूयएवपुनरेवमामांभगवानन्नमयंहिसोम्य
मनइत्यादिविज्ञापयितुंदृष्टांतेनावगमयतुनाद्यापिममास्मिन्नर्थेसम्यङ्निश्चयोजा
यते॥यस्मात्तेजोबन्नमयत्वेनाविशिष्टेदेहएकस्मिन्नुपयुज्यमानान्यप्तेजोऽन्नान्यणिष्ठ
धातुरूपेणमनःप्राणवाचउपचिन्वंतितत्त्वजात्यनतिक्रमेणेतिदुर्विज्ञेयमित्यभिप्रायो
तोभूयएवेत्याह॥तमेवमुक्तवंतंतथास्तुसोम्येतिहोवाचपिताशृण्वत्रदृष्टांतंयथै
तदुपपद्यतेयत्पृच्छसि॥५॥दध्नःसोम्यमथ्यमानस्ययोणिमाणुभावःसऊर्ध्वःसमुदीष
तिसंभूयोर्ध्वंभवतीतिनावेनगच्छतीतितत्सर्पिर्निवपतियथायंदृष्टांतएवमेवखलुसोम्या

न्नस्योदनादेरश्यमानस्यभुज्यमानस्योदर्येणाग्निनावायुसहितेनखजेनेवमथ्यमान
स्ययोणिमासऊर्द्ध्वःसमुदीषतितन्मनोभवतिमनोवयवैःसहसंभूयमनउपचिनोती
त्येतत्तथापांसौम्यपीयमानानांयोणिमासऊर्द्ध्वःसमुदीषतिसप्राणोभवतीत्येवमेवख
लुसोम्यतेजसोश्यमानस्ययोणिमासऊर्द्ध्वःसमुदीषतिसावाग्भवत्यन्नमयंहिसोम्यम
नआपोमयःप्राणस्तेजोमयीवागितियुक्तमेवमयोक्तमित्यभिप्रायोस्त्वेतत्सर्वमेवं
मनस्त्वन्नमयमित्यत्रनैकांतेनममनिश्चयोजातोतोभूयएवमाभगवान्मनसोन्नमय
त्वंदृष्टांतेनविज्ञापयत्वितितथासोम्येतिहोवाचपिता॥५॥६॥अन्नस्यभुक्तस्ययोणि
ष्ठोधातुःसमनसिशक्तिमधादन्नोपचितामनसःशक्तिःषोडशधाविभज्यपुरुषस्य
कलात्वेननिर्दिदिक्षितातस्यामनस्यन्नोपचितयाशक्त्याषोडशधाप्रविभक्तयासंयुक्त
स्तद्वान्कार्यकारणसंघातलक्षणोजीवविशिष्टःपुरुषःषोडशकलउच्यते॥यस्यांसत्यां
द्रष्टाश्रोतामंताबोद्धाकर्त्ताविज्ञातासर्वक्रियासमर्थःपुरुषोभवतिहीयमानायांचयस्यां
सामर्थ्यहानिर्वक्ष्यतिचाथान्नस्यायैद्रष्टेत्यादिसर्वस्यकार्यकारणस्यसामर्थ्यमनःकृत

मेवमानसेनहिबलेनसंपन्नाबलिनोदृश्यंतेलोकेध्यानाहाराश्चकेचिदन्नस्यसर्वा
त्मकत्वादतोन्नकृतंमानसंवीर्यं॥षोडशकलायस्यपुरुषस्यसोयंषोडशकलःपु
रुषएतच्चेत्प्रत्यक्षीकर्तुमिच्छसिपंचदशसंख्याकान्यहानिमाशीरशनंमाकार्षीःका
ममिच्छतोपःपिबयस्मान्नपिबतोपस्तेप्राणोविछेत्स्यतेविछेदमापत्स्यतेयस्मादापोम
योब्विकारःप्राणइत्यवोचाम॥नहिकार्यंस्वकारणोपष्टंभमंतरेणाविच्छिद्यमानंस्थातु
मुत्सहते॥सहैवंश्रुत्वामनसोन्नमयत्वंप्रत्यक्षीकर्तुमिच्छन्पंचदशाहानिनाशाशनंन
कृतवानथषोडशेह्निहएनंपितरमुपससादोपगतवानुपगम्यचोवाचकिंब्रवीमिभो
इतीतरआहऋचःसोम्ययजूंषिसामान्यधीष्वेत्येवमुक्तःपित्राह॥नवैमामामृगादीनिप्रति
भांतिनप्रतिभांतिममममनसिदृश्यंतइत्यर्थोहेभोभगवन्नित्येवमुक्तवंतंपिताहशृणुतत्र
कारणंयेनतेतवतान्यृगादीनिनप्रतिभांतीतितंहोवाचयथालोकेहेसोम्यमहतोभ्य
तस्योर त्परिमाणस्याभ्याहितपचितस्येंधनैरेकोंगारःखद्योतमात्रःखद्योतपरिमाणःशांतस्यप
रिशिष्टोवशिष्टःस्यात्तेनवेनतेनांगारेणततोपितत्परिमाणादीषदपिनबहुदहेदेवमेव

खलुसोम्यतेतवान्नोपचितानांषोडशकलानांएकाकलावयवोतिशिष्टावशिष्टास्या
त्तयात्वंखद्योतमात्रांगारतुल्यायैतर्हिदानींवेदाननुभवसिनप्रतिपद्यसेश्रुत्वाचमे
ममास्माद्भोषंविज्ञास्यस्यशनंकुरुस्वतावस्मद्रतथैवाशनंकृतवानथानंतरंहैनंपितरंशुश्रू
षुरुपससादतंहोपागतंपुत्रंयत्किंचर्ग्वादिषुपप्रछयंयंरूपमर्थजातंवापिताश्वेतके
तुःसर्वंहतत्प्रतिपेदेजगादार्थतोग्रंथतश्चतंहोवाचपुनःपितायथासोम्यमहतोभ्यासि
तस्येत्यादिसमानमेकमंगारंशांतस्याग्नेःखद्योतमात्रंपरिशिष्टंतृणैश्चूर्णैश्चोपसमाधा
यप्राज्वालयेत्तेनदैर्घ्यंछांदसंप्रज्वलितावर्द्धितेत्यर्थःतयावर्द्धितयैतर्हिदानींवेदाननुभव
स्यपालनसएवंव्याख्यत्यनुष्ठानाभ्यामन्नमयत्वंमनसःसिद्धमित्युपसंहरतिअन्नमयंहि
सोम्यमनइत्यादि॥यथैतन्मनसोन्नमयत्वंसिद्धं।तथापोमयःप्राणस्तेजोमयीवागिति
एतदपिसिद्धमेवेत्यभिप्रायस्तदेतद्धास्यपितुरुक्तंमनआदीनामन्नादिमयत्वंविजज्ञौवि
ज्ञातवान्श्वेतकेतुर्द्विरभ्यासस्त्रिवृत्करणसमाप्त्यर्थः॥७॥यस्मिन्मनसिजीवेनात्मनानु
प्रविष्टापरादेवतादर्शइवपुरुषप्रतिबिंबोजलादिष्विवसूर्यादयःप्रतिबिंबैस्तन्मनो

न्नमयंतेजोमयाभ्यांवाक्प्राणाभ्यांसंगतमधिगतं।यन्मयोयस्थःजीवोमननदर्श
नश्रवणादिव्यवहारायकल्पतेतदुपरमेचस्वंदेवतारूपमेवप्रतिपद्यते।तदुक्तंश्रु
त्यंतरे॥ध्यायतीवलेलायतीवसधीःस्वप्नोभूत्वेमंलोकमतिक्रामतिसवाअयमा
त्माब्रह्मविज्ञानमयोमनोमयइत्यादि।स्वप्नेनशारीरमित्यादि।प्राणन्नेवप्राणोनव
तीत्यादितस्यास्यमनःस्थस्यमनआख्यांगतस्यमनउपशमद्वारेणेंद्रियविषयेभ्योनि
वृत्तस्ययस्यांपरस्यांदेवतायांस्वात्मभूतायांयदवस्थानंतत्सुत्रायाचिख्यासुरुद्दालको
हकिलारुणिःश्वेतकेतुंपुत्रमुवाचोक्तवान्॥स्वप्नांतंस्वप्नमध्यंस्वप्नइतिदर्शनवृत्तेः
स्वप्नस्याख्यातस्यमध्यंस्वप्नांतंसुषुप्तमित्येतदथवास्वप्नांतंस्वप्नसतत्वमित्यर्थःत
त्राप्यर्थात्सुषुप्तमेवभवतिस्वमपीतोभवतीतिवचनात्।नह्यन्यत्रसुषुप्तात्स्वमपीतं
जीवस्येछंतिब्रह्मविदस्तत्रह्यादर्शापनयनेपुरुषप्रतिबिंबआदर्शगतोयथास्वमेव
पुरुषमपीतोभवत्येवंमनआद्युपरमेचैतन्यप्रतिबिंबरूपेणजीवेनात्मनायामनसि
प्रविष्टानामरूपव्याकरणायपरादेवतासास्वमेवआत्मानंप्रतिपद्यते॥जीवरूपतांम

नआख्यादित्यतःसुषुप्तएवस्वप्नांतशब्देनवाच्यइत्यवगम्यते।यत्रतुसुप्तःस्वप्नान्पश्य
तितस्वाप्नंदर्शनंसुखदुःखसंयुक्तमितिपुण्यापुण्यकार्यंपुण्यापुण्ययोर्हिसुखदुःखारंभ
कत्वंप्रसिद्धं।पुण्यापुण्ययोश्चाविद्याकामोपादिष्टंतेनैवसुखदुःखदर्शनकार्यस्यैकत्व
मुपपद्यते।नान्यथेत्यविद्याकामकर्मभिःसंसारहेतुभिःसंयुक्तएवस्वप्नेइतिनस्वमपीतो
भवति।अनन्वागतंपापेनतीर्णोहितदासर्वान्शोकान्हृदयस्यभवति।तद्वाअस्यैतद
तिच्छंदाएषपरमआनंदइत्यादिश्रुतिभ्यः॥सुषुप्तएवस्वंदेवतारूपंजीवत्वविनिर्मुक्तंद
र्शयिष्यामीत्याह।स्वप्नांतंमेममनिगदतोहेसोम्यविजानीहिविस्पष्टमवधारयेत्यर्थः॥क
दास्वप्नांतोभवतीत्युच्यते।यत्रयस्मिन्कालेएतन्नामभवतिपुरुषस्यस्वपतःप्रसिद्धंहिलो
केस्वपितीति।गौणंचेदंनामेत्याह।यदास्वपितीत्युच्यतेपुरुषस्तदातस्मिन्कालेसतास
च्छब्दवाच्ययाप्रकृतयादेवतयासंपन्नोभवतिसंगतएकीभूतोभवतिमनसिप्रविष्टंम
नआदिसंसर्गकृतंजीवरूपंपरित्यज्यस्वंसद्रूपंयत्परमार्थसत्यमपीतोअपिगतोभव
ति।अतस्तस्मात्स्वपितीत्येवमाचक्षतेलौकिकाःस्वमात्मानंहियस्मादपीतोभवति।यु

णानामप्रसिद्धितोऽपिस्वात्मप्राप्तिर्गम्यतइत्यभिप्रायः।कथंपुनर्लौकिकानांप्रसिद्धा
स्वात्मसंपत्तिरित्यत्रश्रमनिमित्तोद्भवत्वात्स्वापस्येत्याह।जागरितेहिपुण्यापुण्यनिमि
त्तसुखदुःखाद्यनेकायासानुभवाच्छ्रांतोभवति।ततश्चायस्तानांकरणानामनेकव्या
पारनिमित्तग्लानानांस्वव्यापारेभ्यउपरमोभवति।श्रुतेश्चश्राम्यत्येववाक्श्राम्यति
चक्षुरित्येवमादितथाच॥गृहीतावाग्गृहीतंचक्षुर्गृहीतंश्रोत्रंगृहीतंमनइत्येवमा
दीनिकरणानिप्राणग्रस्तानि।एकोश्रांतोदेहकुलायेयोजागर्तितदाजीवःश्रमापनु
त्तयेस्वंदेवतारूपमात्मानंप्रतिपद्यते।नान्यत्रस्वरूपावस्थानाच्छ्रमापनोदःस्यादि
तियुक्ताप्रसिद्धिर्लौकिकानांस्वंह्यपीतोभवतीति॥दृश्यतेहिलोकेज्वरादिरोगग्रस्तानां
तद्विनिर्मोकेस्वात्मस्थानांविश्रमणंतद्वदिहापिस्यादितियुक्तं॥तद्यथाश्येनोवासुपर्णो
वाविपरिपत्यश्रांतइत्यादिश्रुतेश्च।तत्रायंदृष्टांतोयथोक्तेऽर्थे।सयथाशकुनिःपक्षीश
कुनिघातकस्यहस्तगतेनसूत्रेणप्रबद्धःपाशितोदिशंदिशंबंधनमोक्षार्थीसन्प्रतिदि
शंपतित्वान्यत्रबंधनादायतनमाश्रयंविश्रमणायालब्ध्वाअप्राप्यबंधनमेवोपाश्रयते।

एवमेवयथायंदृष्टांतः।खलुहेसोम्यतन्मनस्तत्प्रकृतंषोडशकलमन्नोपचितंमनोनि
र्धारितंतत्प्रविष्टस्तत्स्थस्तदुपलक्षितोजीवस्तन्मइतिनिर्दिश्यतेमंचक्रोशनवत्समन
आख्योपाधिर्जीवोऽविद्याकामकर्मोपदिष्टांदिशंदिशंसुखदुःखादिलक्षणांजाग्रत्स्वप्न
योःपतित्वागत्वानुभूयेत्यर्थोऽन्यत्रमदाख्याश्चात्मनआपतनंविश्रमणस्थानमलब्ध्वा
प्राणमेवप्राणेनसर्वकार्यकरणाश्रयेणोपलक्षिताःप्राणइत्युच्यते॥सदाख्यापरादे
वता।प्राणस्यप्राणं।प्राणशरीरोभारूपइत्यादिश्रुतेः।एतस्यांदेवतांप्राणांप्राणाख्याम्
वोपश्रयते।प्राणोबंधनंयस्यमनसस्तत्प्राणबंधनंहियस्मात्सोम्यमनःप्राणोपलक्षि
तदेवताश्रयं।मनइतितदुपलक्षितोजीवइत्येवंस्वपितिनामप्रसिद्धिद्वारेणयज्जीव
स्यसत्यंस्वरूपंजगतोमूलंतंसद्दिदर्शयिषुरशनापिपासेअशितुमिच्छाद्युत्रस्यदर्शयित्वा
ह्यान्नादिकार्यकारणपरंपरयापिजगतोमूलंसद्दिदर्शयिषुरशनापिपासेअशितुमि
च्छात्रअशना॥पातुमिच्छापिपासा।तेअशनापिपासेते।अशनापिपासयोःसत
त्वंविजानीहीत्येतत्।यत्रयस्मिन्कालेएतन्नामपुरुषोभवतिकिंतदाशिशिषत्यशितु

मिच्छतीति।तदातस्यपुरुषस्यकिंनिमित्तं।नामभवतीत्याह॥यत्पुरुषेणाशितमन्नंक
ठिनंपीताश्चापोनयंतेद्रवीकृत्यरसादिभावेनविपरिणामयंतितदाभुक्तमन्नंजीर्य
तिअथभवत्यस्यनामाशिशिषतीतिगौणं।जीर्णेह्यन्नेशितुमिच्छतीतिसर्वोजंतुस्तत्रा
पामशितनेतृत्वादशनायाइतिनामप्रसिद्धमित्येतस्मिन्नर्थेयथागोनायोगान्नयतीति
गोनायइत्युच्यतेगोपालस्तथाश्वान्नयतीत्यश्वनायोऽश्वपालउच्यते।पुरुषनायःपुरु
षान्नयतीतिराजासेनापतिर्वैवतत्तदापआचक्षते।लौकिकाअशनायेति।तत्रैवंसत्य
शीरसादिभावेननीतेनाशितेनान्नेनाशिष्यादितमिदंशरीरंवटकणिकामिवशुं
गोंकुरःतद्भिन्नंशुंगंकार्यंशरीराख्यंवटादिशुंगवदुत्पतितंहेसोम्यविजानीहि।किंतत्र
विज्ञेयमित्युच्यते।इदंशुंगवत्कार्यत्वाच्छरीरंनामूलंमूलरहितंभविष्यतीत्युक्तेआ
हश्वेतकेतुः।यद्येवंसमूलमिदंशरीरंवटादिशुंगवत्तस्यअस्यशरीरस्यक्वमूलंस्याद्वे
दित्येवंपृष्टआहपितातस्यक्वमूलंस्यादन्यत्रान्नादन्नंमूलमित्यभिप्रायःकथमशि
तंह्यन्नमद्भिर्द्रवीकृतंजाठरेणाग्निनापच्यमानंरसभावेनपरिणमतेरसाच्छोणितंशो

णितान्मांसंमांसान्मेदोमेदसोस्थ्यस्थिभ्योमज्जामज्ज्ञःशुक्रं।तथायोषितश्चभुक्तंचा
न्नंरसादिक्रमेणैवंपरिणतंलोहितंभवति।ताभ्यांशुक्रशोणिताभ्यामन्नकार्याभ्यां
संयुक्ताभ्यामन्नेनैवंप्रत्यहंभुज्यमानेनापूर्यमाणाभ्यांकुड्यमिवमृत्पिंडैःप्रत्यहमुप
चीयमानोन्नमूलोदेहशुंगःपरिनिष्पन्नइत्यर्थः॥यत्तद्देहशुंगस्यमूलमन्नंनिर्दिष्टं॥
तदपिदेहवद्विनाशोत्पत्तिमत्वात्कस्माच्चिन्मूलादुत्पतितव्यंशुंगएवेतिहेत्वाह।यथादेह
शुंगोन्नमूलएवमेवखलुसोम्यान्नेनशुंगेनतत्कार्यभूतेनापोमूलमन्नस्यशुंगस्याद्भि
श्छप्रतिपद्यअपामपिविनाशोत्पत्तिमत्वाच्छुंगत्वमेवेत्यद्भिःसोम्यशुंगेनकार्येणका
रणंतेजोमूलमन्विच्छतेजसोपिविनाशोत्पत्तिमत्वाच्छुंगत्वमितितेजसासोम्यशुंगेनस
न्मूलमेवाद्वितीयंपरमार्थसत्यंयस्मिन्सर्वमिदंवाचारंभणंविकारोनामधेयमनृतंर
ज्वामिवसर्पादिविकल्पजातमध्यस्तमविद्ययातदस्यजगतोमूलमतःसन्मूलाःसत्का
रणाहेसोम्येमास्थावरजंगमलक्षणाःसर्वाःप्रजाःनकेवलंसन्मूलाएवइदानीमपिस्थि
तिकालेसदायतनाःसदाश्रयाएवनहिमृदमनाश्रित्यघटादेःसत्वंस्थितिर्वास्त्यतोमृद्व

सन्मूलत्वात्प्रजानांसदायतनाःप्रजाःअंतेचसत्प्रतिष्ठाःसदेवप्रतिष्ठालयःसमा
प्तिरवसानंपरिशेषोयासांताःसत्प्रतिष्ठाअथेदानीमप्शुंगद्वारेणसतोमूलस्या
नुगमःकार्यइत्याह॥यत्रयस्मिन्कालेएतन्नामपिपासतिपातुमिच्छतीतिपुरुषो
भवतिअशिशिषतीतिवदिदमपिगौणमेवनामभवतिद्रवीकृतस्याशितस्यान्नस्य
नेत्र्यआपोन्नशुंगंदेहंक्लेदयंत्यःशिथिलीकुर्युरब्बाहुल्याद्यदितेजसानशोष्यंत
नितरांचतेजसाशोष्यमाणास्ताश्चदेहभावेनपरिणममानाउपपातुमिच्छापुरुषस्य
जायते।तदापुरुषःपिपासतिनामतदेतदाह।तेजएवतत्तदापीतमबादिशो
षयद्देहगतलोहितप्राणभावेनपरिणमयति।तद्यथागोनायइत्यादिसमा
नमेवंतत्तेजआचष्टेलोकउदन्येतिउदकंनयतीत्युदन्यमुदन्येतीतिछांदसंतत्रा
पिपूर्ववदपामप्येतदेवशरीराख्यंशुंगंनान्यदित्येवमादिसमानमन्यत्सामर्थ्यात्ते
जसोप्येतदेवशुंगंअतोप्शुंगेनदेहेनापोमूलंगम्यतेअद्भिःशुंगेनतेजोमूलंगम्यते
तेजसाशुंगेनसन्मूलंगम्यतइत्येवंपूर्ववदेवइतितेजोबन्नमयस्यदेहशुंगस्यवाचारंभणमा

त्रस्यान्नादिपरंपरयापरमार्थसत्यंसन्मूलमभयमसंत्रासंनिरायासंसन्मूलम
न्विच्छेतिशुङ्गंगमयित्वाशिशिषतीतिपिपासतीतिनामप्रसिद्धिद्वारेणयदन्यदि
हास्मिन्प्रकरणेतेजोबन्नानांपुरुषेणोपभुज्यमानानांकार्यकारणसंघातस्यदे
हशुंगस्यस्वजात्यसांकर्येणोपचयकरत्वंचवक्तव्यंप्राप्तं॥तदिहोक्तमेवद्रष्टव्य
मित्यत्रहवोक्तिंव्यपदिशति।यथातुखलुयेनप्रकारेणेमास्तेजोबन्नाख्यास्तिस्रो
देवताःपुरुषंप्राप्यत्रिवृत्त्रिवृदेकैकाभवतितदुक्तंपुरस्तादेवभवतिअन्नमशी
तंत्रेधाविधीयतइत्यादि॥तत्रैवोक्तमन्नादीनामशितानांयेमध्यमाधातवस्तेसा
सधातुकंशरीरमुपचिन्वंतीत्युक्तं।मांसंभवतिलोहितंभवतिमज्जाभवतियेत्व
णिष्ठाधातवोमनःप्राणंवाचंदेहस्यांतःकरणसंघातमुपचिन्वंतीतिचोक्तं।तन्म
नोभवतिसप्राणोभवतिसावाग्भवतिसोयंप्राणकरणसंघातोदेहेविशीर्णेदेहां
तरंजीवाधिष्ठितोयेनक्रमेणाश्वीदेहात्प्रच्युतेगच्छतितदाह।अस्यहेसोम्यपुरुष
स्यप्रयतोम्रियमाणस्यवाङ्मनसिसंपद्यतेमनस्युपसंह्रियंते।अथतदाहुर्ज्ञाति

योनवदतीतिमनःपूर्वकोहिवाक्व्यापारोयद्धेमनसाध्यायतितद्वाचावदतीतिश्रु
तेः।वाचउपसंहृतायांमनसिमनोमननव्यापारेणकेवलेनवर्त्तते।मनोपियदोप
संह्रियतेतदामनःप्राणेसंपन्नंभवतिसुषुप्तकालइवतदापार्श्वस्थाज्ञातयोनवि
जानातीत्याहुः।प्राणस्यतदोच्छ्वासीस्वात्मन्युपसंहृतबाह्यकरणःसंवर्गविद्या
यांदर्शनाद्धस्तपादादीन्विक्षिपन्मर्मस्थानानिनिकृंतन्निवोत्सृजन्क्रमेणोपसंहृतस्ते
जसिसंपद्यते।तदाहुर्ज्ञातयोनचलतीतिम्रियतेनेतिवाविचिकित्संतोदेहमालभ
मानाउष्णंचोन्नमानाउष्णंदेहउष्णंजीवतीति।तदातदप्यौष्ण्यलिंगंतेजउपसंह्रि
यतेतदातत्तेजःपरस्यांदेवतायांप्रशाम्यतितदेवंक्रमेणोपसंहृतेस्वमूलप्राप्तेच
मनसितत्स्थोजीवोपिसुषुप्तकालवन्निमित्तोपसंहारादुपसंह्रियमाणःसत्याभि
संधिपूर्वकंचेदुपसंह्रियतेतदेवसंपद्यतेनपुनर्देहांतरायसुषुप्तादिवोत्थायमृत्वा
पुनर्देहजालमाविशतियस्मान्मूलादुत्थायदेहमाविशतिजीवःसयःसदाख्यएषउ
क्तोणिमाणुभावोजगतोमूलमैतदात्म्यमेतदेवसदात्मायस्यसर्वस्यतदेतदात्म्यं

तस्य भाव एतदात्म्यमेतं नासदाख्येनात्मनात्मवत्सर्वमिदं जगन्नान्योस्त्यात्मासंसा
री।नान्यदतोस्ति द्रष्टृ नान्यदतोस्ति श्रोत्रित्यादिश्रुत्यंतरात् येन चात्मनात्मवत्सर्वमिदं
दं जगत्तदेव सदाख्यं कारणं सत्यं परमार्थसदतः स एवात्मा जगतः प्रत्यक्स्वरूपं स
तत्त्वं याथात्म्यमात्मशब्दस्य निरुपपदस्य प्रत्यगात्मगवादिशब्दवन्निरूढत्वादतस्त
त्त्वमसीति हे श्वेतकेतो इत्येवं प्रत्यायितः पुत्र आह भूय एव मा भगवान्विज्ञापय
त्वियद्भवद्वक्तं तत्संदिग्धं मम यदहन्यहनि सर्वाः प्रजाः सुषुप्ते सत्संपद्यंत इत्येतद्येन स
ति संपद्य न विदुः सत्संपन्ना वयमित्यतो दृष्टांतेन मां प्रत्याययत्वित्यर्थः।एवमुक्तस्तथा
स्तु सोम्येति होवाच पिता॥८॥यत्पृच्छस्यहन्यहनि सत्संपद्य न विदुः सत्संपन्नाः स्म इ
ति तत्कस्मादित्यत्र शृणु दृष्टांतं॥यथा लोके सोम्य मधु मधुकृतो मधु कुर्वंति निमधुक
तो मधुकरमक्षिका मधु निस्तिष्ठंति निमधुनि ष्पादयंति तद्धा परा संतः कथं।नानात्यया
नां नानागतीनां नानादिक्कानां वृक्षाणां रसान्समवहारं समवहृत्यैकतामेकभावं मधुत्वे
रसान्नामयंति मधुत्वमापादयंति।ते रसा मधुत्वेनैकतां गतास्तत्र मधुनि विवेकं न लभं

ते॥कथं।अमुष्याऽमात्रस्य पनसस्य वाहं वृक्षस्य रसोस्मीति॥यथा हि लोके बहूनां चे
तनावतां समेतानां प्राणिनां विवेकबोधो भवति अमुष्याहं पुत्रोमुष्याहं नप्ता
इति ते च लब्धविवेकाः संतो न संकीर्यंते।न तथेहानेकप्रकारवृक्षरसानामपि मधुरा
म्लतिक्तकटुकादीनां मधुत्वेनैकतां गतानां मधुरादिभावेन विवेको गृह्यत इत्यभि
प्रायो यथायं दृष्टांत इत्येवमेव खलु सोम्येमाः सर्वाः प्रजा अहन्यहनि सति संपद्य सु
षुप्तकाले मरणप्रलययोश्च न विदुर्न विजानीयुः सति संपद्यामह इति सति संपन्ना इति वा।यस्मा
च्चैवमात्मनः सद्रूपतामज्ञात्वैव सत्संपद्यंते तस्मादिह लोके यत्कर्मनिमित्तां यां यां जाति
प्रतिपन्ना आसुः व्याघ्रादीनां व्याघ्रोहं सिंहोहमित्येवं।यत्कर्मज्ञानवासनांकिताः सं
तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवंति पुनः स।तदागत्य व्याघ्रो वा सिंहो वा वृको
वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यत्पूर्वमिह लोके भवंति बभूवुरि
त्यर्थस्तदेव पुनरागत्य भवंति।युगसहस्रकोट्यंतरितापि संसारिणो जंतोर्या पुरा भावि
ता वासना सा न नश्यतीत्यर्थः।ताः प्रजा यस्मिन्प्रविश्य पुनराविर्भवंति।ये त्वितोन्ये स

सत्यात्मानि संधाय मरणसुप्तांवंसदात्मानं प्रविश्य नावर्त्तंते। सयएषोणिमेत्यादिव्याख्या
तं। यथा लोके स्वकीये गृहे सुखसुप्तस्तद्वायया मांतरं गतोज्ञानाति स्वगृहादागतोस्मीति
एवं सत आगतोस्मीति चन जंतूनां कस्माद्विज्ञानं न भवतीति त्वयएवमा भगवान्विज्ञाप
यत्वित्युक्तस्तथा सोम्येति होवाच पिता॥९॥ शृणु तत्र दृष्टांतं यथा सोम्येमा नद्यो गंगा
द्याः पुरस्तात्पूर्वां दिशं प्रति प्राच्यः प्रागंचनाः स्यंदंते स्रवंति। पश्चात्प्रतीचीं दिशं प्रति सिंध्वा
द्याः प्रतीचीमंचंति गच्छंति प्रतीच्यः ताः समुद्रादंभोनिधेर्जलधरैराक्षिप्ताः पुनर्वृष्टिरू
पेण पतिता गंगादि नदीरूपिण्यः पुनः समुद्रमंभोनिधिमेवापियंति। स समुद्र एव भव
ति। ता नद्यो यथा तत्र समुद्रे समुद्रात्मनैकतां गता न विदुर्न विजानंतीयं गंगाहमस्मी
यं यमुनाहमस्मीतीयं महस्मीति चैवमेव खलु सोम्येमाः सर्वाः प्रजा यस्मात्सति संप
द्य न विदुः सत आगच्छामह आगता इति वा। तइह व्याघ्र इत्यादि समानमन्यत्। दृष्टं लो
के जलवीचीतरंगफेनबुद्बुदादयः उच्छ्रिताः पुनस्तद्भावं गता विनष्टा इति जीवाः कृतत्का
रणभावं प्रत्यहं गच्छंतोपि सुषुप्तौ मरणप्रलययोश्च न विनश्यंतीत्येतदयएवमा भगवा

न्विज्ञापयत्वहं दृष्टांतेन सोम्येति होवाच पिता॥१०॥ ॥शृणु दृष्टांतमस्य हे सोम्य महतोने
कशाखादियुक्तस्य वृक्षस्येत्यग्रतः स्थितं वृक्षं निदर्शयन्नाह॥ यदि कश्चिदस्य मूलेभ्याह
न्यात्परश्वादिना सकृद्घातमात्रेण न शुष्यति। जीवेन भवति तदा तस्य रसः स्रवेत्तथा
यो मध्येभ्याहन्याज्जीवन्स्रवेद्यायोग्रेभ्याहन्याज्जीवंस्रवेत्स एष वृक्ष इदानीं जीवेनात्म
नानुप्रभूतोनुव्याप्तः पेपीयमानोत्यर्थं पिबन्नुदकं भौमांश्च रसान्मूलैर्मोदमानो हृष्टा
कुवंस्तिष्ठति। तस्यास्य यदेकां शाखां रुग्णामाहतां वा जीवो जहात्युपसंहरति शाखा
यां विप्रसृतमात्मांशं। अथ सा शुष्यति। वाङ्मनःप्राणकरणग्रामानुप्रविष्टो हि जीव इति
तदुपसंहारेणोपसंह्रियते जीवेन च प्राणयुक्तेनाशितं पीतं च रसतां गतं जीवच्छरीरं वृ
क्षं वर्धयद्रसरूपेण जीवस्य सद्भावे लिंगं भवति। अशितपीताभ्यां हि देहे जीवस्तिष्ठति
ते चाशितपीते जीवकर्मानुसारिणी इति तस्यैकांगवैकल्यनिमित्तं कर्म यदोपस्थितं भ
वति। तदा जीव एकां शाखां जहाति शाखाया आत्मानमुपसंहरति। अथ तदा शाखा शु
ष्यति जीवस्थितिनिमित्तो रसो जीवकर्माक्षिप्तो जीवोपसंहारेन तिष्ठति। रसापगमे च

शाखाशोषमुपैति।तथासर्वंवृक्षमेवयदायंजहातितदासर्वोपिवृक्षःशुष्यतिवृक्षस्य
रसस्रवणशोषणादिलिंगाज्जीववत्त्वं।दृष्टांतःश्रुतेश्चचेतनावंतःस्थावराइतिबौद्धका
णादमतमचेतनाःस्थावराइत्येतदसारमितिदर्शितंभवति।यथास्मिन्वृक्षदृष्टांतेदर्शि
तंजीवेनयुक्तोवृक्षोशुष्कोरसपानादियुक्तोजीवतीत्युच्यते।तदपेतश्चम्रियतइत्यु
च्यते।एवमेवखलुसोम्यविद्धीतिहोवाचजीवापेतंजीववियुक्तंवावकिलेदंशरीरंम्रि
यतेनजीवोम्रियतइतिकार्यशेषेचसुप्तोत्थितस्यममेदंकार्यमपरिसमाप्तमितिस्मृत्वा
समापनदर्शनाज्जातमात्राणांचजंतूनांस्तन्याभिलाषभयादिदर्शनाच्चातीतजन्मांत
रानुभूतस्तनपानदुःखानुभवस्मृतिर्गम्यते।अग्निहोत्रादीनांचवैदिकानांकर्मणामर्थ
वत्त्वाच्चजीवोम्रियतइति।सयएषोणिमेत्यादिसमानं।कथंपुनरिदमत्यंतस्थूलंपृथिव्या
दिनामरूपवज्जगदत्यंतसूक्ष्मात्सद्रूपान्नामरूपरहितात्सतोजायतइत्येतद्दृष्टांतेन
भूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाचपिता॥११॥ख॥यद्येतत्प्रत्यक्षीक
र्तुमिच्छस्यतोस्मान्महतोन्यग्रोधात्फलमेकमाहरेत्युक्तस्तथाचकारसइदंभगवउप

हृतंफलमितिदर्शितवंतंप्रत्याह।फलंभिंधीतिभिन्नमित्याहेतरस्तमाहपिता।किम
त्रपश्यसीत्युक्तआह।अस्यएवास्यअणुतराइवेमाधानाबीजानिपश्यामिभगवइत्यासां
धानांतस्यांभिन्नायांकिंपश्यसीत्युक्तआह।नकिंचनपश्यामिभगवइतितंपुत्रंहोवा
चवटधानायांभिन्नायांयंवटबीजाणिमानंहेसोम्यएतंननिभालयसेनपश्यसीति
याप्येतस्यवैकिलसोम्यएषमहान्न्यग्रोधोबीजस्याणिम्नःसूक्ष्मस्यादृश्यमानस्यका
र्यभूतस्थूलःशाखास्कंधफलपलाशवान्नित्युत्पन्नःसमुत्तिष्ठतीतिचेच्छब्दोध्याहार्यो
तःश्रद्धत्स्वसोम्यसतएवाणिम्नःस्थूलंनामरूपादिमत्कार्यंजगदुत्पन्नमिति।यद्यपि
न्यायागमाभ्यांनिर्धारितोर्थस्तथैवेत्यवगम्यते।तथाप्यत्यंतसूक्ष्मेष्वर्थेषुबाह्यविषया
सक्तमनसःस्वभावप्रवृत्तस्यासत्यांगुरुतरायांश्रद्धायांदुरवगमत्वंस्यादित्याहश्रद्धत्स्वे
ति।श्रद्धायांतुसत्यांमनसःसमाधानंबुभुत्सितेर्थेभवेत्ततश्चतदर्थावगतिरन्यत्रमना
अभूवमित्यादिश्रुतेः।सयइत्याद्युक्तार्थं।यदिसज्जगतोमूलंकस्मान्नोपलभ्यतइत्ये
तद्दृष्टांतेनमाभगवान्भूयएवविज्ञापयत्वितितथासोम्येतिहोवाच॥१२॥ख॥विद्यमा

नमपिवस्तुनोपलभ्यतेप्रकारांतरेणतूपलभ्यतइतिशृणुअत्रदृष्टांतंयदिचेममर्थंप्र
त्यक्षीकर्तुमिच्छसिपिंडरूपंलवणमेतदुदकेवधायप्रक्षिप्याथमामांश्वः
प्रातरुपसीदथाउपगच्छेथाइतिसहपित्रोक्तमर्थंप्रत्यक्षीकर्तुमिच्छन्तथाचकार।तंहो
वाचपरेद्युःप्रातः।यल्लवणंदोषारात्रौउदकेवाधानिहितवानसिअंगतदाहरेत्यु
क्तस्तल्लवणमाजिहीर्षुर्हकिलनावममर्शोदकेनविवेकेनविज्ञातवान्यथातल्लवणंवि
द्यमानमपिसदप्सुलीनंसंश्लिष्टमभूत्।यथाविलीनंलवणंनवेत्थतथापितच्चक्षुस्प
र्शनेनपिंडनैनरूपंलवणमगृह्यमाणंविद्यतएवाप्सूपलभ्यतेचोपायांतरेणेत्येतत्पु
त्रंप्रत्याययितुमिच्छन्नाह।अंगास्योदकस्यांतादुपरिगृहीत्वाचामेति।उक्त्वापुत्रंतथाकृ
तवंतमुवाचकथमिति।इतरआहलवणंस्वादुइति।तथामध्यादुदकस्यगृहीत्वाचा
मेतिकथमिति।लवणमिति।तथांतादधोदेशाद्गृहीत्वाचामेतिकथमिति।लवणमि
ति।यद्येवंअभिप्राश्यपरित्यज्यैतदुदकमाचम्याथमोपसीदथाइति।तद्धतथाचकार।
लवणंपरित्यज्यपितृसमीपमाजगामेत्यर्थः।इदंवचनंब्रुवंस्तल्लवणंतस्मिन्नेवोदकेन

यन्मयारात्रौनिहितंतच्छश्वन्नित्यंसंवर्त्ततेविद्यमानंसत्सम्यग्वर्त्ततइतीत्येवमुक्तवंतंतं
होवाचपिता।यथेदंलवणंदर्शनस्पर्शनाभ्यांपूर्वंगृहीतंपुनरुदकेविलीनंताभ्याम
गृह्यमाणमपिविद्यतएवोपायांतरेणजिह्वयोपलभ्यमानत्वादेवमेवात्रवाअस्मिन्ने
वतेजोबन्नादिकार्येशुंगेदेहेवावकिलेत्याचार्योपदेशस्मरणप्रदर्शनार्थौ।सत्तेजो
बन्नादिशुंगकारणंवटबीजाणिमवद्विद्यमानमेवेंद्रियैर्नोपलभसे।ननिभालयसे
यथात्रैवोदकेदर्शनस्पर्शनाभ्यामनुपलभ्यमानंलवणंविद्यमानमेवजिह्वयोपलब्ध
वानसिएवमेवात्रैवकिलविद्यमानंसज्जगन्मूलंसदुपायांतरेणलवणाणिमवदुप
लप्स्यसइतिवाक्यशेषः।सयइत्यादिसमानं।यद्येवंलवणाणिमवदिंद्रियैरनुपलभ्य
मानमपिजगन्मूलंसदुपायांतरेणोपलब्धुंशक्यते।यदुपलंभात्कृतार्थःस्यामनुपलं
भाच्चाकृतार्थःस्यामहं।तस्यैवोपलब्धौकउपायः।इत्येतद्भूयएवमाभगवान्विज्ञापय
तुदृष्टांतेन।तथासोम्येतिहोवाच॥३॥यथालोकेहेसोम्यपुरुषंयंकंचिद्गंधारेभ्यो
जनपदेभ्योनिनद्धाक्षंबद्धचक्षुषमानीययस्मात्तस्करस्तमभिनद्धाक्षमेवबद्ध

ण्यमरण्येततोप्यतिजनेतिगतजनेत्यंतविविक्तेजनेदेशेविसृजेत्।सतत्रदिङ्मोहोपे
तोयथाप्राङ्वाप्रागंचनःप्राङ्मुखोवेत्यर्थः।तथोदङ्वाधराङ्वाप्रत्यङ्वाप्रध्मायीतशब्दं
कुर्याद्विक्रोशेत्।अभिनद्धाक्षोहंगंधारेभ्यस्तस्करेणानीतोभिनद्धाक्षएवविसृष्टइवि
क्रोशतस्तस्ययथाभिनहनंबंधनंप्रमुच्यमुक्त्वाकारुणिकःकश्चिदेतांदिशमुत्तरतो
गंधाराएतांदिशंव्रजेतिप्रब्रूयात्सएवंकारुणिकेनबंधनान्मोक्षितोग्रामाद्ग्रामांतरंपृच्छ
न्पंडितउपदेशवान्मेधावीपरोपदिष्टग्रामप्रवेशमार्गावधारणसमर्थःसन्गंधारा
नेवोपसंपद्येतनेतरोमूढमतिर्देशांतरदर्शनतृष्णोवायथायंदृष्टांतोवर्णितःस्वविष
येभ्योगंधारेभ्यःपुरुषस्तस्करैरभिनद्धाक्षोविवेकोदिङ्मूढोशनापिपासादिमान्
व्याघ्रतस्कराद्यनेकभयानर्थव्रातयुतमरण्यंप्रवेशितोदुःखार्तोविक्रोशन्बंध
नेभ्योमुमुक्षुस्तिष्ठति।कथंचिदेवकारुणिकेनकेनचिन्मोक्षितःस्वदेशंगंधारान्
एवापन्नोनिर्वृतःसुख्यभूत्।एवमेवसतोजगदात्मनःस्वरूपात्तेजोबन्नादिमयंदे
हारण्यंवातपित्तकफरुधिरमेदमांसास्थिमज्जाशुक्रकृमिमूत्रपुरीषवच्छीतोष्णा

द्यनेकद्वंद्वदुःखवच्चेदंमोहपटाभिनद्धाक्षोभार्यापुत्रमित्रपशुबंधवादिदृष्टादृष्टानेक
विषयतृष्णापाशितःपुण्यापुण्यादितस्करैःप्रवेशितोहममुष्यपुत्रोममैतेबांधवाः
सुख्यहंदुःखीमूढःपंडितोधार्मिकोबंधुमाञ्जातोमृतोजीर्णःपापीपुत्रोमेमृतोधनंमे
नष्टंहाहतोस्मिकथंजीविष्यामिकामेगतिःकिंमेत्राणमित्येवमनेकशतसहस्रान
र्थजालवान्विक्रोशन्कथंचिदेवपुण्यातिशयात्परमकारुणिकंकंचिद्ब्रह्मात्मविद
मतिविमुक्तबंधनंब्रह्मनिष्ठंयदासादयति।तेनचब्रह्मविदाकारुण्याद्दर्शितसंसार
विषयदोषदर्शनमार्गोविरक्तःसंसारविषयेभ्योनासित्वंसंसार्यमुष्यपुत्रत्वादिधर्म
वान्।किंतर्हिसद्यत्तत्त्वमसीत्यविद्यामोहपटाभिनहनान्मोक्षितोगंधारपुरुषवच्चस्वं
सदात्मानमुपसंपद्यसुखीनिर्वृतःस्यादित्येतमेवार्थमाहाचार्यवान्पुरुषोवेदेति।त
स्यास्यैवमाचार्यवतोमुक्ताविद्याभिनहनस्यतावदेवतावानेवकालश्चिरंक्षेपःसदा
त्मस्वरूपसंपत्तेरितिवाक्यशेषः।कियान्कालश्चिरमित्यपेक्ष्यते।यावन्नविमोक्ष्येनवि
मोक्ष्यतइत्येतत्पुरुषत्वयेनसामर्थ्यात्।येनकर्मणाशरीरमारब्धंतस्योपभोगेनक्ष

याद्देहपातोयावदित्यर्थः॥ अथतदैवसत्संपत्स्येसंपत्स्यतेइतिएवंचित्ननहिदेहमो
क्षस्यसत्संपत्तेश्चकालभेदोस्ति॥ येनाथशब्दआनंतर्यार्थःस्यात्॥ ननुयथाविद्विज्ञा
नानंतरमेवदेहपातःसत्संपत्तिश्चनभवति॥ कर्मशेषवशात्तथाप्रवृत्तफलानिप्रा
क्ज्ञानोत्पत्तेर्जन्मांतरसंचितान्यपिकर्माणिसंतीतितत्फलोपभोगार्थंचावश्यंशरी
रांतरमारब्धव्यंध्रुवफलत्वान्नब्रह्मविदःशरीरेपतितेयेशरीरांतरमारब्धव्यमप्रवृ
त्तकर्मफलोपभोगार्थमित्येतदसद्विदुषस्तस्यतावदेवचिरमितिश्रुतेःरपिप्रामाण्या
त्ननुपुण्योवैपुण्येनकर्मणाभवतीत्यादिश्रुतेरपिप्रामाण्यमेव॥ सत्यमेवं॥ तथापिप्र
वृत्तफलानामप्रवृत्तफलानांचकर्मणांविशेषोस्तिकथं॥ यानिप्रवृत्तफलानिकर्मा
णियैःशरीरमारब्धंतेषामुपभोगेनैवक्षयोयथारब्धवेगस्यलक्ष्यमुक्तेषोरादेवेगक्ष
यादेवस्थितिर्नत्विलक्ष्यव्याधसमकालमेवप्रयोजनंनास्तीतितद्वदन्यानित्वप्रवृत्तफ
लानीहप्राक्ज्ञानोत्पत्तेरूर्ध्वंचकृतानिवाक्रियमाणानिवातीतजन्मांतरकृतानिवाप्र
वृत्तफलानिज्ञानेनदह्यंतेप्रायश्चित्तेनैवज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेति

स्मृतेश्चाक्षीयंतेचास्यकर्माणीतिचाथर्वणे॥ अतोब्रह्मविदोजीवितादिप्रयोजनाभा
वेपिप्रवृत्तफलानांकर्मणामवश्यमेवफलोपभोगःस्यादितियुक्तमुक्तंतस्यताव
देवचिरमितियुक्तमेवोक्तमिति॥ यथोक्तदोषचोदनानुपपत्तिःज्ञानोत्पत्तेरूर्ध्वंचि
ब्रह्मविदःकर्माभावमवोचाम॥ ब्रह्मसंस्थोमृतत्वमेतीत्यत्रनचस्मर्तुमर्हसि॥ सयइ
त्याद्युक्तार्थंयआचार्यवान्विद्वान्येनक्रमेणसत्संपद्यतेतंक्रमंदृष्टांतेनदर्शयएव
माभगवान्विज्ञापयत्वितितथासोम्येतिहोवाचपिता॥१४॥ ॥पुरुषंहेसोम्यउपतापि
नंज्वराद्युपतापवंतंज्ञातयोबांधवाःपरिवार्यपासतेमुमूर्षुंजानासिमांतवपित
रंपुत्रंभ्रातरंवेतिपृच्छंतस्तस्यमुमूर्षोर्यावन्नवाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्ते
जसितेजःपरस्यांदेवतायामित्येतदुक्तार्थं॥ संसारिणोयोमरणक्रमःसएवायंवि
दुषोपिसत्संपत्तिक्रमइत्येतदाहपरस्यांदेवतायांतेजसिसंपन्नोथनजानाति॥ अवि
द्वांस्तुसतउत्थायप्राग्भावितंव्याघ्रादिभावंमनुष्यादिभावंवाविशति॥ विद्वांस्तुशास्त्रा
चार्योपदेशजनितज्ञानदीपप्रकाशितंसद्ब्रह्मात्मानंप्रविश्यनावर्ततइत्येषसत्संप

त्क्रमोऽन्यत्रमूर्द्धन्ययानाड्योत्क्रम्यादित्यादिद्वारेणसद्गच्छंतीत्याहुः।तदसत्।देशकालनिमि
त्तफलाभिसंधानेनगमनदर्शनात्।नचसदात्मैकत्वदर्शिनःसत्याभिसंधस्यदेशकालनि
मित्तफलाद्यनृताभिसंधिरुपपद्यते।विरोधात्।अविद्याकामकर्मणांचगमननिमित्तानांस
द्विज्ञानहुताशनविप्लुष्टत्वाद्गमनानुपपत्तिरेवपर्याप्तकामस्यकृतात्मनस्त्विहैवसर्वे
प्रविलीयंतेकामाइत्याद्याथर्वणेनदीसमुद्रदृष्टांतश्रुतेश्च।सयइत्यादिसमानं।यदिमरि
ष्यतोमुमुक्षतस्यचतुल्यासत्संपत्तिस्तत्रविद्वान्संसंपन्नोनावर्त्तते।आवर्त्ततेऽविद्वानित्यत्र
कारणंदृष्टांतेनभूयएवमाभगवान्विज्ञापयत्विति।तथासोम्येतिहोवाचपिता॥१५॥शृणु
यथासोम्यपुरुषंचौर्यकर्मणिसंदह्यमानंनिग्रहायपरीक्षणायचोतापिहस्तगृहीतंबद्ध
हस्तमानयंतिराजपुरुषाःकिंकृतवानयमितिपृष्टाश्चाहुरपहार्षीद्धनमस्यायंतेचाहुःसं
दिह्यमानास्तेयमकार्षीस्त्वमस्यधनस्येतिनाभिसंधेश्चापह्नुवानेआहुःपरशुमस्मैतपतेति
शोधयित्वात्मानमिति।सयदितस्यस्तेयस्यकर्त्ताभवतिबहिश्चापह्नुवातेसएवंभूतस्तत
एवानृतमन्यथाभूतंसंतमन्यथात्मानंकुरुतेसतथानृताभिसंधोऽनृतेनात्मानमंतर्धा

व्यवहितंतप्त्वापरशुंतंसंमोहात्प्रतिगृह्णातिसंदह्यइन्यतेराजपुरुषैःस्वकृतेनानृताभि
संधिदोषेणाथयदितस्यकर्मणोऽकर्त्ताभवतिततएवसत्यमात्मानंकुरुतेसतथास्तेया
ऽकर्तृतयात्मानमंतर्धायपरशुंतप्तंप्रतिगृह्णातिससत्याभिसंधःसन्नदह्यतेसत्यव्य
वधानात्।अथमुच्यतेचमृषाभियोक्तृभ्यःतप्तपरशुहस्ततलसंयोगस्यतुल्यत्वेपिस्तेय
कर्त्रकर्त्रोरनृताभिसंधोदह्यते।नतुसत्याभिसंधःसयथासत्याभिसंधस्तप्तपरशुग्र
हणकर्मणिसत्यव्यवहितहस्तत्वान्नदाह्यतेनदह्येतेतदेवंसद्ब्रह्मसत्याभिसंधी
तयोःशरीरपातकालेतुल्यायांसत्संपत्तौविद्वान्संपद्यपुनरनर्व्याघ्रदेवादिदेहग्रहणा
यावर्त्तते।अविद्वांस्तुविकारानृताभिसंधःपुनर्व्याघ्रादिभावंदेवतादिभावंवायथाक
र्मयथाश्रुतंप्रतिपद्यते।यदात्माभिसंधानाभिसंधिकृतेमोक्षबंधनेयच्चमूलंजगतोयदा
यतनायस्थानिष्ठाश्चसर्वाःप्रजाःयदात्मकंचसर्वंयच्चाजममृतमभयंशिवमद्वितीयंतत
सत्यंसआत्मातत्त्वमसिश्वेतकेतोइत्युक्तार्थमसकृद्वाक्यंकःपुनरसौश्वेत
केतुस्तंशास्त्रार्थयोऽहंश्वेतकेतुरुद्दालकस्यपुत्रइतिवेदात्मानमादेशंश्रुत्वामत्वाविज्ञा

यवाश्रुतमश्रुतमविज्ञातंविज्ञातुंपितरंपप्रच्छ।कथंनुभगवःसआदेशोभवतीति।
सएवाधिज्ञातःश्रोतामंताविज्ञातातेजोबन्नमयंकार्यकारणसंघातंप्रविष्टापरैवदे
वतानामरूपव्याकरणादर्शेइवपुरुषःसूर्यादिरिवजलादौप्रतिबिंबरूपेणसआत्मानं
कार्यकारणेभ्यःप्रविविक्तंसद्रूपंसर्वात्मानंप्राक्पितुःश्रवणान्नविजज्ञावथेदानीं
पित्राप्रतिबोधितस्तत्त्वमसीतिदृष्टांतैर्हेतुभिश्चतत्पितुरस्यहरूपंकिलोक्तंसदेवाहम
स्मीति।विजिज्ञौविज्ञातवानुद्विर्वचनमध्यायपरिसमाप्त्यर्थं॥१६॥किंपुनरत्रषष्ठेवा
क्यप्रमाणेनजनितंफलमात्मनिकर्तृत्वभोक्तृत्वयोरधिज्ञातत्वविज्ञाननिवृत्तिस्तस्यफ
लंवयमवोचाम।त्वंशब्दवाच्यमर्थंश्रोतुंमंतुंचाधिज्ञातत्वमविज्ञातविज्ञानफलार्थं
प्राक्श्रुतेस्तस्माद्विज्ञाना।विदंहमेवंकरिष्याम्यग्निहोत्रादीनिकर्माण्यहमत्राधिज्ञातःएषां
चकर्मणांफलमिहामुत्रचभोक्ष्येऽस्ततेषुवाकर्मसुस्वतन्त्रकर्त्तास्मीत्येवंकर्तृत्वभोक्तृत्व
योरधिज्ञातोस्मीत्यात्मनियाद्विज्ञानमभूत्तस्ययत्सज्जगतोमूलमेकमेवाद्वितीयंतत्त्वम
सीत्यनेनवाक्येनप्रतिबुद्धस्यनिवर्त्ततेविरोधान्नह्येकस्मिन्नद्वितीयआत्मन्ययमहम

स्मीतिविज्ञातेममेदमन्यदनेनकर्त्तव्यमिदंकृत्वास्यफलंभोक्ष्यइतिवा।नेदविज्ञानमुप
पद्यतेतस्मात्सत्यस्याद्वितीयात्मविज्ञानविकारानृतजीवात्मविज्ञानंनिवर्त्ततइतियु
क्तं।ननुतत्त्वमसीत्यत्रत्वंशब्दवाच्येर्थेसद्बुद्धिरादिश्यते।यथादित्यमनआदिषुब्रह्म
बुद्धिःयथाचलोकेप्रतिमादिषुविष्ण्वादिबुद्धिस्तद्वत्तुसदेवत्वमिति।यदिसदेव
श्वेतकेतुःस्यात्कथमात्मानंनविजानीयाद्येनतस्मैतत्त्वमसीत्युपदिश्यते।नादित्या
दिवाक्यवैलक्षण्यादादित्योब्रह्मेत्यादावितिशब्दव्यवधानान्नसाक्षाद्ब्रह्मत्वंगम्य
ते।रूपादिमत्वाच्चादित्यादीनामाकाशमनसोश्चेतिशब्दव्यवधानादेवाब्रह्मत्वमिह
तुसन्नएवदेहप्रवेशंदर्शयित्वातत्त्वमसीतिनिरंकुशंसदात्मभावमुपदिशति।ननु
पराक्रमादिगुणसिंहोसित्वमितिवत्तत्त्वमसीतिस्यान्नमृदादिवत्सदेकमेवाद्वितीयं
सत्यमित्युपदेशान्नचोपचारविज्ञानात्तस्यतावदेवचिरमितिसत्संपत्तिरुपदिश्यते।
मृषात्वादुपचारविज्ञानस्य।त्वमिंद्रोयमइतिवन्नापिस्तुतिरुपास्यत्वाच्छ्वेतकेतोः।नापि
सतःश्वेतकेतुत्वोपदेशेनस्तूयते।नहिराजादासस्त्वमितिस्तुत्यःस्यान्नापिसतःसर्वात्मन

एकदेशेनिरोधोयुक्तःतत्त्वमसीतिदेशाधिपतेरिवग्रामाध्यक्षस्त्वमिति।नचान्यागति
रिहसदात्मत्वोपदेशादर्थांतरस्तुतामंभवंति।सदस्मीतिबुद्धिमात्रमिहकर्त्तव्यतयाचो
द्यतेनतत्त्वज्ञानंसदस्मीतिज्ञाप्यतइतिचेत्।नह्यस्मीत्यसकृतंकृतंनभवति।स्याद्व्यनुपप
न्नं।न।सदस्मीतिबुद्धिविधेःकृतार्थत्वात्।आचार्यवान्वेदतस्यतावदेवचिरमित्युपदे
शात्।यदिहिसदस्मीतिबुद्धिमात्रंकर्त्तव्यतयाविधीयतेनतुत्वंशब्दवाच्यस्यसद्रूपस्य
त्वमेवतदा।नाचार्यवान्वेदेतिज्ञानोपायोपदेशोवाच्यःस्यात्।यथाग्निहोत्रंजुहुया
दित्येवमादिष्वर्थमात्रमेवाचार्यवत्त्वमिति।तद्वत्तस्यतावदेवचिरमितिचक्षेपक
रणंनयुक्तंस्यात्।सदात्मत्वेविज्ञातेपिसद्बुद्धिमात्रकरणमोक्षप्रसंगान्नचतत्त्वम
सीत्युक्तेनाहंसदितिप्रमाणवाक्यजनितांबुद्धिंनिवर्त्तयितुंशक्यानोत्पन्नेतिवाशक्यं
वक्तुं।सर्वोपनिषद्वाक्यानांतत्परतयैवोपक्षयात्।यथाग्निहोत्रादिविधिजनिताग्निहोत्रा
दिकर्त्तव्यताबुद्धिनामतथार्थत्वस्यमनुत्पन्नात्वंवानशक्यतेवक्तुं।नन्व।यत्तूक्तंसदात्मा
सन्नात्मानंकथंनजानीयादितिनासौदोषः।कार्यकारणसंघातव्यतिरिक्तोहंजीवः

नोक्तेप्यपिस्वभावतःप्राणिनांविज्ञानादर्शनात्।किंतुतस्यसदात्मविज्ञानंतस्मादि
काराद्ग्रनाधिष्ठितजीवात्मत्वविज्ञाननिवर्त्तकमेवेदंवाक्यंतत्त्वमसीतिसिद्धमिति
१७॥ ॥छ॥ ॥इतिश्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राजकाचा
र्यस्यश्रीमच्छंकरभगवतःकृतौछांदोग्योपनिषद्विवरणेषष्ठःप्रपाठकःसमाप्तः॥ ॥
परमार्थतत्त्वोपदेशप्रधानपरःषष्ठोऽध्यायःसदात्मैकत्वनिर्णयपरतयैवोपयुक्तोनसतोर्वा
ग्विकारलक्षणानितत्त्वानिनिर्दिष्टानीत्यतस्तानिनामादीनिप्राणांतानिक्रमेणनिर्दिश्यतद्द्वा
रेणापिभूमाख्यंनिरतिशयंतत्त्वंनिर्देक्ष्यामीतिशाखाचंद्रदर्शनवदितीमंसप्तमंप्रपाठकमा
रभते।अनिर्दिष्टेषुहिसतोर्वाक्तत्त्वेषुसन्मात्रेचनिर्दिष्टेन्यदप्यविज्ञातंस्यादित्याशंकाक
स्यचित्स्यात्सामान्यादीनिवातानिनिर्दिदिक्षुस्त्यथवासोपानारोहणवत्स्थूलादारभ्यसूक्ष्मंसू
क्ष्मतरंचबुद्धिविषयंज्ञापयित्वातदतिरिक्तेस्वाराज्येभिषेक्ष्यामीतिनामादिनिर्दिदिक्षत्य
थवानामाद्युत्तरोत्तरविशिष्टानितत्त्वान्यतितरांचतेषामुत्कृष्टतमंभूमाख्यंतत्त्वमितितत्स्तु
त्यर्थंनामादीनांक्रमेणोपन्यासः।आख्यायिकापरविद्यास्तुत्यर्था।अथवानारदोदेव

वर्षिःकृतकर्त्तव्यःसर्वविद्योपिसन्ननात्मवित्त्वाच्छुशोचैव।किंतुवक्तव्यमन्योल्पविज्ञं
जंतुरकृतपुण्यातिशयोकृतार्थइत्यथवानान्यदात्मज्ञानान्निरतिशयःश्रेयःसाधनमस्ती
त्येतत्प्रदर्शनार्थंसनत्कुमारनारदाख्यायिकारभ्यते।येनविज्ञानसाधनसंपन्नस्यापिना
रदस्यदेवर्षेःश्रेयोनबभूवयेनोत्तमाभिजनविद्यावृत्तसाधनशक्तिसंपत्तिनिमित्ताभिमा
नंहित्वाप्राकृतपुरुषवत्सनत्कुमारमुपससादश्रेयःसाधनप्राप्तयेतःप्रख्यापितंभव
तिनिरतिशयश्रेयःप्राप्तिसाधनत्वमात्मविद्याया इति॥अधीहि।अधीष्वभगवोभगवन्नि
तिहकिलोपससादअधीहिभगवइतिमंत्रः।सनत्कुमारंयोगीश्वरंब्रह्मिष्ठंनारदउप
सन्नवान्।तन्न्यायेनोपसन्नंहोवाचयदात्मविषयेकिंचिद्वेत्थतेनतत्प्रख्यापनेनमामु
पसीदेहमहंजाने।ततोहंभगवतोविज्ञानात्तेतुभ्यमूर्ध्वंवक्ष्यामीत्युक्तवतिसहोवाच
नारदः।ऋग्वेदंभगवोध्येमिस्मरामि।यद्वेत्थेतिविज्ञानस्यपृष्टत्वात्तथायजुर्वेदंसामवेद
माथर्वणंचतुर्थंवेदं।वेदशब्दस्यप्रकृतत्वादितिहासपुराणंपंचमंवेदं।वेदानांभारतपंच
मानांवेदव्याकरणमित्यार्थोव्याकरणेनहिपदादिविभागशऋग्वेदादयोज्ञायंते।पित्र्यं

श्राद्धकल्पं।राशिंगणितं।दैवमुत्पातज्ञानं।निधिं।महाकालादिनिधिशास्त्रं।वाकोवाक्यंत
र्कशास्त्रं।एकायनंनीतिशास्त्रं।देवविद्यांनिरुक्तंब्रह्मणऋग्यजुःसामाख्यस्यविद्यांब्रह्म
विद्यांशिक्षाकल्पछंदश्चितयोभूतविद्यांभूतमंत्रंक्षत्रविद्यांधनुर्वेदंनक्षत्रविद्यांज्योति
षंसर्पदेवजनविद्यांसर्पविद्यांगारुडंदेवजनविद्यांगंधवर्क्तियुक्तिनृत्यगीतवाद्यशिल्पा
दिविज्ञानानि।एतत्सर्वंहेभगवोध्येमि।सोहंभगवएतत्सर्वंजानन्नपिमंत्रविदेवास्मि
मंत्रवित्कर्मविदित्यर्थोमंत्रेषुकर्म्माणीतिहिविद्यते।नात्मविज्ञात्मानंवेद्मि।नन्वा
त्मापिमंत्रैःप्रकाश्यतएवेतिकथंमंत्रविच्चेन्नात्मवित्।न।अभिधानाभिधेयभेदस्य
विकारत्वात्।नचविकारआत्मेष्यते।नत्वात्मात्मशब्देनाभिधीयते।न।यतोवाचोनि
वर्त्ततेयत्रनान्यत्पश्यतीत्यादिश्रुतेः।कथंतर्ह्यात्मेवाधस्तात्सआत्मेत्यादिशब्दाआत्मा
नंप्रत्याययंति।नैषदोषः।देहवतिप्रत्यगात्मनिभेदविषयेप्रयुज्यमानःशब्दोदेहादीनामा
त्मत्वेप्रत्याख्यायमानेयत्परिशिष्टंसदवाच्यमपिप्रत्याययति।यथासराजिकायांदृश्य
मानायांसेनायांछत्रध्वजपताकादिव्यवहितेदृश्यमानेएषराजादृश्यतइतिभवतिशब्द

प्रयोगः॥तत्रकोसौराजेतिराजविशेषनिरूपणायांदृश्यमानेतरप्रख्यानेऽन्यस्मिन्दृ
श्यमानेराजनिराजप्रत्ने।तिर्त्तवेन्नस्माज्ञोऽमंत्रवित्कर्मविदेवास्मि।कर्म्मकार्यंचसर्वोविका
रइतिविकारज्ञएवास्मिनात्मवित्प्रकृतिस्वरूपज्ञइत्यर्थः।नत्वोक्तमाचार्यवान्पुरु
षोवेदेतिश्रुतोवाचोनिवर्त्तन्तइत्यादिश्रुतिभ्यश्च।श्रुतमागज्ञानमस्त्येवहियस्मान्मेमम
भगवदृशेभ्योयुष्मत्सदृशेभ्यस्तरइतिश्रुतिमतिशोकंमनस्तापमकृतार्थबुद्धिता
मात्मविदित्यतःसोऽहमनात्मविद्भावहेभगवःशोचाम्यकृतार्थबुध्यासंतप्येसर्वदातं
मामांशोकस्यशोकसागरस्यपारंभगवांस्तारयत्वात्मज्ञानोडुपेनकृतार्थबुद्धिमापा
दयतु।अभयंगमयत्वित्यर्थः।तमेवमुक्तवंतंहोवाचयद्वैकिंचैतदध्यगीष्ठाअधीतवा
नस्यध्ययनेनतदर्थज्ञानमुपलक्ष्यतेज्ञानवानसीत्येतन्नामैवेतद्वाचारंभणंविकारोना
मधेयमितिश्रुतेः।नामवैऋग्वेदोयजुर्वेदइत्यादिनामैवैतन्नामोपास्वब्रह्मेतिब्रह्मबु
ध्यायथाप्रतिमांविष्णुबुद्ध्योपास्तेतद्वत्सयस्तुनामब्रह्मेत्युपास्तेतस्ययत्फलंभवति
तच्छृणुयावन्नाम्नोगतंनाम्नोगोचरंतत्रतस्मिन्नामविषयेस्ययथाकामचारःकामचरणं

राजइवस्वविषयेभवतियोनामब्रह्मेत्युपास्तइत्युपसंहारः॥किमस्तिभगवोनाम्नोभूयो
धिकतरंयद्ब्रह्मदृष्ट्यर्हमन्यदित्यभिप्रायः।सनत्कुमारआह॥नाम्नोवावभूयोऽस्त्येवेत्यु
क्तआह।यद्यस्तितन्मेभगवान्ब्रवीत्विति॥१॥ ॥वाग्वाववागितींद्रियंजिह्वामूलादिष्व
ष्टसुस्थितंवर्णानामभिव्यंजकं।वर्णाश्चनामेतिनाम्नोवाग्भूयसीत्युच्यते।कार्यात्कारणं
हर्ष भूयोदृष्टंलोके॥यथापुत्रात्पिता।तद्वत्।कथंचवाङ्नाम्नोभूयसीत्याह।वाग्वाऋग्वेदंविज्ञा
पयत्ययमृग्वेदइतितथायजुर्वेदमित्यादिसमानं।हृदयज्ञंहृदयप्रियं।तद्विपरीतमहृदय
ज्ञं।यद्यदिवाङ्नाभविष्यत्।वागभावेध्ययनाभावोऽध्ययनाभावेतदर्थश्रवणाभावःतच्छ्रु
वणाभावेधर्मादिनव्यज्ञापयिष्यन्नविज्ञातमभविष्यदित्यर्थः।तस्माद्वागेवैतच्छब्दोच्चारणे
नसर्वंविज्ञापयत्यतोभूयसीवाङ्नाम्नस्तस्माद्वाचंब्रह्मेत्युपास्व।समानमन्यत्॥छ॥२॥
मनोमनस्यनविशिष्टमंतःकरणंवाचोभूयस्तद्धिमनस्यनव्यापारवद्वाचंवक्तव्येप्रेरय
ति।तेनवाङ्मनस्यंतर्भवति।यच्चयस्मिन्नंतर्भवतितत्तस्यव्यापकत्वात्ततोभूयोभवति।य
थावैलोकेद्वेवामलकेफलेद्वेवाकोलेबदरफलेद्वौवाक्षौविभीतकफलेमुष्टिरनुभव

तिमुष्टिस्तेफलेव्याप्नोतिमुष्टौहितेअंतर्भवंति।एवंवाचंनामचामलकादिवन्मनोनु
भवतिसयदापुरुषोयस्मिन्कालेमनसांतःकरणेनमनस्यति।मनस्यनंविवक्षाबुद्धिः
कथंमंत्रानधीयीयोच्चारयेयमित्येवंविवक्षांकृत्वाअथाधीते।तथाकर्माणिकुर्वीयेति
चिकीर्षाबुद्धिंकृत्वाअथकुरुते।पुत्रांश्चपशूंश्चेच्छेयेतिप्राप्तीच्छांकृत्वातत्प्राप्त्युपायानु
ष्ठानेनाथेच्छतेपुत्रादीन्प्राप्नोतीत्यर्थः।तथेमंचलोकममुंचोपायेनेच्छेयमितितत्प्राप्त्यु
पायानुष्ठानेनाथेच्छतेप्राप्नोति।मनोह्यात्मात्मनःकर्तृत्वंभोक्तृत्वंचसतिमनसिनान्य
थेतिमनोह्यात्मेत्युच्यते।मनोहिलोकः।सत्येवहिमनसिलोकोभवतितत्प्राप्त्युपाया
नुष्ठानंचेतिमनोहिलोकः।यस्मात्तस्मान्मनोहिब्रह्म।यतएवंतस्मान्मनउपास्स्वेति
सयोमनइत्यादिसमानं॥७॥३॥संकल्पोवावमनसोभूयान्।संकल्पोपिमनस्यन
वदंतःकरणवृत्तिःकर्तव्याकर्तव्यविषयविभागेनसमर्थनं।विभागेनहिसमर्थि
तेविषयेचिकीर्षाबुद्धिर्मनस्यनानंतरंभवति।कथं।यदावैसंकल्पयतेकर्तव्यादिविष
यान्विभजतइदंकर्तुंयुक्तमिति।अथमनस्यतिमंत्रानधीयीयेत्यादि।अथानंतरंवाच

मीरयति।मंत्राद्युच्चारणे।तांचवाचंनाम्निनामोच्चारणनिमित्तंविवक्षांकृत्वेरयति।
नाम्निनामसामान्येमंत्राःशब्दविशेषाःसंतएकंभवंत्यंतर्भवंतीत्यर्थः।सामान्येहि
विशेषोंतर्भवति।मंत्रेषुकर्माण्येकंभवंतिमंत्रप्रकाशितानिकर्माणिक्रियंते।नामं
त्रकमस्तिकर्मयद्धिमंत्रप्रकाशनेनलब्धसत्ताकंसत्कर्मब्राह्मणेनेदंकर्तव्यमस्मैफ
लायेतिविधीयते।याप्युत्पत्तिर्ब्राह्मणेषुकर्मणोदृश्यतेसापिमंत्रेषुलब्धसत्ताका
नामेवकर्मणांस्पष्टीकरणं।नह्यमंत्रप्रकाशितंकर्मकिंचिद्ब्राह्मणेउत्पन्नंदृश्यते
त्रयीविहितंकर्मेतिप्रसिद्धंलोकेत्रयीशब्दश्चऋग्यजुःसामसमाख्या।मंत्रेषुकर्माणिक
वयोयान्यपश्यन्नितिचाथर्वणे।तस्माद्युक्तंमंत्रेषुकर्माण्येकंभवंति।तानिहवाएता
निमनआदीनिसंकल्पैकायनानिसंकल्पएकायनंगमनंप्रलयोयेषांतानिसंकल्पै
कायनानि।संकल्पात्मकान्युत्पत्तौसंकल्पेप्रतिष्ठितानिस्थितौ।समक्लृपतांसंकल्पंकृ
तवत्याविवद्यौश्चपृथिवीचद्यावापृथिव्यौनिश्चलत्वेनलक्ष्येते।समकल्पेतांवायुश्चाका
शंच।एतावपिसंकल्पंकृतवंताविव।तथासमकल्पंतामापश्चतेजश्चस्वेनरूपेणनिश्च

तानिलक्ष्यंते।यतस्तेषांद्यावापृथिव्यादीनांसंक्लृप्त्यैसंक्लृप्तैःसंकल्पनिमित्तंवर्षंसं
कल्पतेसमर्थंभवतितथावर्षस्यसंक्लृप्तैसंकल्पनिमित्तमन्नंसंकल्पतेसमर्थ
ंभवत्यन्नस्यसंक्लृप्त्यैप्राणाःसंकल्पंतेऽन्नमयाहिप्राणाअन्नोपष्टंभकाह्यन्नंदा
मेतिहिश्रुतिस्तेषांसंक्लृप्त्यैमंत्राःसंकल्पंते।प्राणवान्हिमंत्रानधीते।नाबलः।मंत्रा
णांहिसंक्लृप्त्यैकर्म्माण्यग्निहोत्रादीनिसंकल्पंतेऽनुष्ठीयमानानिमंत्रप्रकाशितानि
समर्थंभवंतिफलायततोलोकःफलंसंकल्पते।कर्तृसमवायितयासमर्थंभव
तीत्यर्थोलोकस्यसंक्लृप्त्यैसर्वंजगत्संकल्पते।स्वरूपावैकल्यायैतद्धीदंसर्वंजग
द्यत्फलावसानंतत्सर्वंसंकल्पमूलमतोविशिष्टःसएषसंकल्पः।अतःसंकल्पमुपा
स्वेत्युक्ताफलमाह।तदुपासंकल्पस्यमयःसंकल्पंब्रह्मेतिब्रह्मबुध्योपाक्लृप्ता
न्वैधात्रास्येमेलोकाःफलमितिक्लृप्तान्समर्थितान्संकल्पितान्सविद्वान्ध्रुवा
न्नित्यानत्यंताध्रुवापेक्षयाध्रुवश्चस्वयंलोकिनोऽध्रुवत्वेलोकेध्रुवत्वासिद्धेरि
तिध्रुवःसन्प्रतिष्ठितानुपकरणसंपन्नानित्यर्थः।पशुपुत्रादिभिःप्रतितिष्ठतीति

दर्शनात्।स्वयंचप्रतिष्ठितआत्मीयोपकरणसंपन्नोऽव्यथमानानमित्रादित्रास
रहितानव्यथमानश्चस्वयमभिसिध्यत्यभिप्राप्नोतीत्यर्थः।यावत्संकल्पस्यगतं
संकल्पगोचरः।तत्रास्ययथाकामचारोभवत्यात्मनःसंकल्पस्यनतुसर्वेषांसंक
ल्पस्येतीतरफलविरोधात्।यःसंकल्पंब्रह्मेत्युपास्तइति।पूर्ववत्॥३॥४॥चित्तंवाव
संकल्पाद्भूयःचित्तंचेतयितृत्वंप्राप्तकालानुरूपबोधवत्त्वमतीतानागतविषयप्रयो
जननिरूपणसामर्थ्यंचतत्संकल्पादपिभूयः।कथं।यदावैप्राप्तंवस्त्विदमेवंप्राप्तमिति
चेतयते।तदातदानायवापाहायवायसंकल्पयतेऽथमनस्यतीत्यादिपूर्ववत्।तानिसं
कल्पादीनिकर्मफलांतानिचित्तैकायनानिचित्तात्मानिचित्तोत्पन्नानिचित्तेप्रतिष्ठि
तानिचित्तस्थितान्यपिपूर्ववत्।किंचित्तस्यमाहात्म्यंयस्माच्चित्तंसंकल्पादिमूलं।त
स्माद्यद्यपिबहुविद्बहुशास्त्रादिपरिज्ञानवानचित्तोभवतिप्राप्तादिचेतयितृत्वसा
मर्थ्यविरहितोभवतितंनिपुणालौकिकानायमस्तिविद्यमानोऽप्यसन्नमएवेत्येनमा
हुर्यच्चायंकिंचिच्छास्त्रादिवेदश्रुतवांस्तदप्यस्यवृथैवेतिकथयंति।कस्माद्यद्ययंविवि

ह्याद्यादिष्टमेवमचित्तोनस्यात्तस्मादस्यश्रुतमप्यश्रुतमेवेत्याहुरित्यर्थोयद्यल्पविद्
पियदिचित्तवान्भवतितस्मैएतस्मैतदुक्तार्थग्रहणायैवोतापिशुश्रूषंतेश्रोतुमिच्छंति
तस्माद्धचित्तंह्येवैषांकल्यादीनामेकायनमित्यादिपूर्ववत्।चित्तात्तुपचितान्बुद्धि
मद्गुणैःसचित्तोपासकोध्रुवानित्यादिचोक्तार्थं॥७॥५॥ध्यानंवावचित्ताद्भूयोध्यानंना
मशास्त्रोक्तदेवताद्यालंबनेष्वचलोभिन्नजातीयैरनंतरितःप्रत्ययसंतानःएकाग्रते
तियमाहुःदृश्यतेचध्यानस्यमाहात्म्यंफलतःकथंयथायोगीध्यायन्निश्चलोभव
तिध्यानफललाभे।एवंध्यायंतीवनिश्चलादृश्यतेपृथिवीध्यायंतीवांतरिक्षमित्या
दिसमानमन्यत्।देवाश्चमनुष्याश्चदेवमनुष्यामनुष्याएववादेवसमादेवमनुष्याः
गुणसंपन्नामनुष्यादेवस्वरूपंनजहतीत्यर्थः।यस्मादेवंविशिष्टंध्यानंतस्माद्यइहलो
केमनुष्याणामेवधनेविद्ययागुणैर्वामहत्तांमहत्त्वंप्राप्नुवंतिनिधनादिमहत्त्वहेतुंल
भंतइत्यर्थः।ध्यानापादांशाइवध्यानस्यापादनामापादोध्यानफललाभइत्येतत्तस्यां
शोवयवःकलाकाचित्ध्यानफललाभकलावंतइवेत्यर्थः।तेभवंतिनिश्चलाइवल

क्ष्यंतेनक्षुद्राइव।यत्पुनरल्पाःक्षुद्राःकिंचिदपिधनादिमहत्त्वैकदेशमप्राप्तास्तेसर्वो
क्तविपरीताःकलहिनःकलहशीलाःपिशुनाःपरदोषोद्भासकाउपवादिनःपरदोष
सामीप्ययुक्तमेववदितुंशीलंयेषांतेउपवादिनश्चभवंत्यथायेमहत्त्वंप्राप्ताधनादिनि
मित्तंतेऽन्यान्प्रतिप्रभवंतीतिप्रभवोविद्याचार्यराजेश्वरादयोध्यानापादांशाइवेत्याद्यु
क्तार्थंअतोदृश्यतेध्यानस्यमहत्त्वंफलतोतोभूयश्चित्तादतस्तदुपास्स्वेत्याद्युक्तार्थं
॥७॥६॥विज्ञानंवावध्यानाद्भूयोविज्ञानंशास्त्रार्थविषयंज्ञानंतस्यध्यानकारणत्वा
द्ध्यानाद्भूयस्त्वं।कथंतस्यभूयस्त्वमित्याहविज्ञानेनऋग्वेदंविजानाति।अयमृग्वेदइ
तिप्रमाणेनयागस्यार्थज्ञानंध्यानकारणंतथायजुर्वेदमित्यादि।किंच।पश्वादींश्चधर्मा
धर्मौशास्त्रप्रसिद्धौसाध्वसाधुनीलोकतःस्मार्तेवादृष्टविषयंचसर्वंविज्ञानेनैवविजा
नातीत्यर्थः।तस्माद्युक्तंध्यानाद्विज्ञानस्यभूयस्त्वं।अतोविज्ञानमुपास्स्वेति।शृणूपा
सनफलंविज्ञानवतोविज्ञानंयेषुतान्।विज्ञानवतोलोकान्ज्ञानवतश्चाभिसिद्ध्यति।
अभिप्राप्नोतिविज्ञानंशास्त्रार्थविषयं।ज्ञानमन्यविषयंनैपुण्यंतद्वद्भिर्युक्तान्लोका

त्प्राप्नोतीत्यर्थोयावद्विज्ञानस्येत्यादिपूर्ववत्॥७॥बलंवावविज्ञानाद्भूयोबलमित्यन्नो
पयोगजनितंमनसोविज्ञेयेप्रतिभावेनसामर्थ्यं।अनशनादृगादीनिनवैमाप्रतिभां
न्तिभोइतिश्रुतेःशरीरेपितद्वोत्थानादिसामर्थ्यंयस्माच्छतमप्येकःप्राणीबलवाना
कंपयतेयथाहस्तीमत्तोमनुष्याणांशतंसमुदितमपियस्मादेवमन्नाद्युपयोगनिमि
त्तंसपुरुषोयदाबलीबलेनतद्वान्भवत्यथोत्थातोत्थानस्यकर्त्तानिषेवंचगुरूणामाचा
र्यस्यचपरिचरितापरिचरणस्यशुश्रूषायाःकर्त्ताभवतिपरिचरन्नुपसत्तातेषांसमीप
गोंतरंगःप्रियोभवतीत्यर्थः।उपसीदंश्चसामीप्यंगच्छन्नेकाग्रतयाचार्यस्यान्यस्यचोप
देष्टुर्गुरोर्द्रष्टाभवतिततस्तदुक्तस्यश्रोताभवति।ततइदमेवंनिरुक्तमेवमुपपद्यतइत्यु
पपत्तितोमंताभवति।मन्वानश्चबोद्धाभवतिएवमेवेदमितिततएवंनिश्चित्यतदुक्तार्थ
स्यकर्त्तानुष्ठाताभवतिविज्ञातानुष्ठानफलस्यानुभविताभवतीत्यर्थः।किंच।बलस्य
माहात्म्यं।बलेनवैपृथिवी।तिष्ठतीत्याद्युक्तार्थं॥२॥८॥अन्नंवावबलाद्भूयोबलहे
तुत्वात्कथंबलस्यहेतुत्वमित्युच्यते।यस्माद्बलकारणमन्नंतस्माद्यद्यपिकश्चिद्दशरा

त्रींनाश्नीयात्सोन्नोपयोगनिमित्तस्यबलस्यहान्याम्रियतेनचेन्म्रियतेयद्युपजीवेद्
श्यंतेहिमासमप्यनश्नतोजीवंतोथवासजीवन्नप्यद्रष्टाभवतिगुरोरपिततएवाश्रो
तेत्यादिपूर्वविपरीतंसर्वंभवतिअथयदाबहून्यहान्यनशितोदर्शनादिक्रियास्व
समर्थःसन्नन्नस्यायी।आगमनमायोन्नस्यप्राप्तिरित्यर्थः।आयी।आयैइत्येतद्वर्ण
व्यत्ययेनअथवान्नस्यायैइत्यपिपाठेएवमेवार्थोद्रष्टेत्यादिकार्यश्रवणाद्दृश्यते
ह्यन्नोपयोगेदर्शनादिसामर्थ्यंनतदप्राप्तावतोन्नमुपास्वेतिफलंचान्नवतःप्रभूता
न्नान्वैसलोकान्पानवतःप्रभूतोदकांश्चान्नपानयोर्नित्यसंबंधात्लोकानभि
सिध्यतिसमानमन्यत्॥२॥९॥आपोवाअन्नाद्भूयस्योन्नकारणत्वात्यस्मादेवंत
स्माद्यदायस्मिन्कालेसुवृष्टिःसस्यहिताशोभनावृष्टिर्नभवतितदाव्याधीयंतेप्रा
णादुःखिताभवंतिकिंनिमित्तमित्याहान्नमस्मिन्संवत्सरेनःकनीयोल्पतरंभवि
ष्यतीत्यर्थः।पुनर्यदासुवृष्टिर्भवतितदानंदिनःसुखिनोहृष्टाःप्राणिनोभवंत्यन्नंब
हुप्रभूतंभविष्यतीत्यप्संभवत्वान्मूर्त्तस्यान्नस्यापएवेमामूर्त्तामूर्त्तिभेदाकारपरि

णाताइतिमूर्त्तयियंपृथिवीयदंतरिक्षमित्यादि।आपएवेमामूर्त्ताअतोपउपास्स्वेतिफलं
सयोपोब्रह्मेत्युपास्तेआप्नोतिसर्वान्कामान्काम्यान्मूर्त्तविषयानित्यर्थः।अपांनवत्वा
च्चरसेरत्रुपासनात्तृप्तिमांश्चभवति।समानमन्यत्॥ख॥तेजोवावअद्भ्योभूयस्तेजसोका
रणत्वात्।कथमकारणत्वमित्याह॥यस्माद्व्योनितेजःतस्मात्तद्वैएतत्तदेतत्तेजोवा
युमागृह्यावष्टभ्यस्वात्मनानिश्चलीकृत्यवायुमाकाशमभितपत्याकाशमभिव्याप्नु
वत्तपतियदातदाहुर्लौकिकानिशोचतिनितपतिसामान्येनजगन्नितपतिदेहानता
वर्षिष्यतिवैइतिप्रसिद्धंहिलोकेकारणमभ्युद्यतंदृष्टवतःकार्यंभविष्यतीतिविज्ञा
नं।तेजएवतत्पूर्वमात्मानमभ्युद्धृतंदर्शयित्वाथानंतरमपःसृजतेतोप्स्रष्टृत्वात्भूयो
ऽद्भ्यस्तेजः।किंचान्यत्तदेततेजऊर्ध्वाभिश्चोद्गताभिर्विद्युद्भिस्तिरश्चीभिश्चतिर्यग्गताभि
श्चसहह्रादाःशब्दाश्चरंतितस्मात्तद्दर्शनादाहुर्लौकिकाविद्योततेस्तनयति
वर्षिष्यतिवाइत्याद्युक्तार्थं।अतस्तेजउपास्स्वेति।तस्यतेजउपासनफलंतेजस्वीवैभ
वति।तेजोवतएवचलोकान्भास्वतःप्रकाशवतोपहततमस्कान्बाह्याध्यात्मिकाज्ञा

नाद्यपहततमस्कानभिसिध्यतिस्पष्टार्थमन्यत्॥ख॥११॥आकाशोवावतेजसोभूया
न्वायुसहितस्यतेजसःकारणत्वाद्व्योम्नोवायुमागृह्येतितेजसासहोक्तोवायुरिति
पृथगिहनोक्तस्तेजसःकारणंहिलोकेकार्याद्भूयोदृष्टंयथापयाघटादिभ्योमृत्तथा
काशोवायुसहितस्यतेजसःकारणमितिततोभूयान्।कथमाकाशेवैसूर्याचंद्रमसा
वुभौतेजोरूपौविद्युन्नक्षत्राण्यग्निश्चतेजोरूपाण्याकाशेंऽतःयच्चयस्यांतर्वर्त्तितदल्पं
भूयइतरत्।किंचाकाशेनाह्वयतिचान्यमन्यआहूतश्चेतरआकाशेनशृणोतिअन्यो
क्तंचशब्दमन्यःप्रतिशृणोतिआकाशेरमतेक्रीडत्यन्योन्यंसर्वस्तथानरमतेचाकाशे
बंध्वादिवियोगेआकाशेजायतेनमूर्त्तेनावष्टब्धेतथाकाशमभिलक्ष्यांकुरादिर्जायते
नप्रतिलोममाकाशमुपास्स्वफलंशृणुआकाशवतोवैविस्तारयुक्तान्सविस्तारान्लोकान्
प्रकाशवतःप्रकाशाकाशयोर्नित्यसंबंधात्प्रकाशवतश्चलोकानसंबाधान्संबा
धनंसंबाधःसंबाधोन्यस्यपीडातद्रहितानसंबाधानुरुगायवतोविस्तीर्णगतीन्विस्ती
र्णप्रचारान्लोकानभिसिध्यतियावदाकाशस्येत्याद्युक्तार्थं॥ख॥१२॥स्मरोवावआका

शाद्भूयःस्मरणंस्मरोंतःकरणधर्म्मःसकाशाद्भूयानितिद्रष्टव्यंलिंगव्यत्ययेनस्मर्तुःस्म
रणेहिसतिआकाशादिसर्वमर्थवत्स्मरणवतोभोग्यत्वादसतितुस्मरणेसदप्यसदेव
सत्वकार्याभावात्।नापिसत्वंस्मृत्यभावेशक्यमाकाशादीनामवगंतुमित्यतःस्मर
णस्याकाशाद्भूयस्त्वं।दृश्यतेहिलोकेस्मरणस्यभूयस्त्वंयस्मात्तस्माद्यद्यपिसमुदिताब
हवएकस्मिन्नासीरन्नुपविशेयुःतेतत्रासीनाअन्योन्यभाषितमपिनस्मरंतश्चेत्स्युः।नै
वतेकंचनशब्दंशृणुयुस्तथानमन्वीरन्मंतव्यंचेत्स्मरेयुस्तदामन्वीरन्नथविजानीरन्स्मृ
त्यभावान्नमन्वीरन्।तथानविजानीरन्यदावावतेस्मरेयुर्मंतव्यंविज्ञातव्यंश्रोतव्यंचा
थशृणुयुरथमन्वीरन्नथविजानीरन्।तथास्मरेणवैममपुत्राएतइतिपुत्रान्विजानाति
स्मरेणपशूंश्च।अतोभूयस्त्वात्स्मरणस्योपास्वेतिक्रमार्थमन्यत्॥७॥१३॥आशावावस्मरा
द्भूयसी।अप्राप्तवस्त्वाकांक्षा।आशा।तृष्णाकामइतियामाहुःपर्यायैः।साचस्मराद्भू
यसी।कथमाशयाह्यंतःकरणस्थयास्मरतिस्मर्तव्यं।आशाविषयरूपंस्मरन्सोस्मरोभव
त्यतआशेद्धःआशयाभिवर्द्धितःस्मरन्नतःस्मरन्नृगादीन्मंत्रानधीतेधीत्यचतद[illegible]

णविधींश्चश्रुत्वाकर्माणिकुरुतेतत्फलाशयैव।पुत्रांश्चपशूंश्चकर्म्मफलभूता[illegible]ते
निवांछतिआशयैवतत्साधनान्यनुतिष्ठन्तिमंचलोकमाशेद्धएवस्मरन्लोकसंग्रह
हेतुभिरिच्छन्नमुंचलोकमाशेद्धःस्मरंस्तत्साधनानुष्ठानेनेच्छतेआशारशनाबद्धंस्मरा
काशादिनामपर्यंतंजगच्चक्रीभूतंप्रतिप्राणिअतःआशायाःस्मरादपिभूयस्त्व
मित्यतआशामुपास्वयस्त्वाशांब्रह्मेत्युपास्तेशृणुतस्यफलं।आशयासदोपासितया
स्योपासकस्यसर्वेकामाःसमृध्यंतिसमृद्धिंगच्छति।अमोघाह्यास्याशिषःप्रार्थनाःसर्वा
भवंतियत्प्रार्थितंसर्वंतदवश्यंभवतीत्यर्थः।यावदाशागतमित्यादिसर्ववत्॥७॥१४॥ना
मोपक्रममाशांतंकार्यकारणत्वेननिमित्तनैमित्तिकत्वेनचोत्तरोत्तरंभूयस्तथावस्थितं।
स्मृतिनिमित्तसद्भावमाशारशनापाशैर्विपाशितंसर्वतोबिसमिवतंतुभिर्यस्मिन्प्राणेसम
र्पितंयेनचसर्वतोव्यापितांतर्बहिर्गतेनसूत्रेमणिगणइवसूत्रेणग्रथितंविधृतंसएष
प्राणोवैआशायाभूयान्कथमस्यभूयस्त्वमित्याहदृष्टांतेनसमर्थयन्भूयस्त्वं।यथावै
लोकेरथचक्रस्याराःरथनाभौसमर्पिताःप्रोताःसंप्रवेशिताइत्येतदेवमस्मिन्लिंगसंघा

तद्रूपप्राणेप्रज्ञात्मनिदिदृक्षेत्मुख्येयस्मिन्परादेवतानामरूपव्याकरणायादर्शादौ
प्रतिबिंबवज्जीवेनात्मनानुप्रविष्टायस्तुमहाराजस्येवंसर्वाधिकारीश्वरस्य।कस्मि
न्वहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृज
तेतिश्रुतेः।यस्तुच्छायेवानुगतईश्वरंतद्यथारथस्यारेषुनेमिरर्पितोनाभावराअर्पिता
एवमेवैतान्भूतमात्राःप्रज्ञामात्रास्वर्पिताःप्रज्ञामात्राःप्राणेर्पिताःसएषप्राणएवप्र
ज्ञात्मेतिकौषीतकीनामतएवमस्मिन्प्राणेसर्वंयथोक्तंसमर्पितं।अतःसएषप्राणोऽप
रतंत्रःप्राणेनस्वशक्त्यैवयाति।नान्यगतं।गमनादिक्रियास्वस्यसामर्थ्यमित्यर्थः।सर्वंक्रि
याकारकफलंनेदजातंप्राणएव।नप्राणाद्बहिर्भूतमस्तीतिप्रकरणार्थः।प्राणःप्राण
ददातियद्ददातितत्स्वात्मभूतमेव।यस्मैददातितदपिप्राणायैवातःपित्राद्याख्योपिप्रा
णएवकथंपित्रादिशब्दानांप्रसिद्धार्थोत्सर्गेणप्राणविषयत्वमित्युच्यते।सतिप्राणेपि
त्रादिषुपित्रादिशब्दप्रयोगात्।तदुत्क्रांतौचप्रयोगाभावात्।कथंतदित्याह।सयःकश्चि
त्पित्रादीनामन्यतमंयदिभृशमिवतदननुरूपमिवकिंचिद्वचनंत्वंकारादियुक्तंप्रत्याह॥

तदैनंपार्श्वस्थाआहुःविवेकिनोधिक्त्वास्तुधिगस्तुत्वामित्येवंपितृहावैत्वंपितृहईत्यादि
अथैनानेवोत्क्रांतप्राणांस्त्यक्तदेहान्नाथान्यद्यपिशूलेनसमासंसमस्यव्यतिषंदहेत्
व्यत्यस्यसंदहेदेवमतिक्रूरमपिकर्मसमासव्यासादिप्रकारेणदहनलक्षणंतद्देह
संबद्धमेवकुर्वाणंनैवैनंब्रूयुःपितृहेत्यादि।तस्मादन्वयव्यतिरेकाभ्यामेवंगम्यते।
एतत्पित्राद्याख्योपिप्राणएवेति।तस्मात्प्राणोह्येवैतानिपित्रादीनिसर्वाणिभवति
चलानिस्थिराणिचसवाएषप्राणविदेवंयथोक्तप्रकारेणपश्यन्फलतोन्वन्नेवं
मन्वानउपपत्तिनिश्चिंतयन्नेवंविजानन्नुपपत्तिःसंयोज्येवमेवेतिनिश्चयंकुर्वित्यर्थः
मननविज्ञानाभ्यांहिसंभृतःशास्त्रार्थोनिश्चितोदृष्टोभवेदतएवंपश्यन्नतिवादी
भवतिनामाद्याशांतमतीत्यवदनशीलोभवतीत्यर्थः।तंचेद्ब्रूयुस्त्वंयदिएवमतिवा
दिनंसर्वदासर्वैःशब्दैर्नामाद्याशांतमतीत्यवर्तमानंप्राणमेववदत्येवंपश्यंतमति
अतिवादिनंवदनशीलंब्रह्मादिस्तंबपर्यंतस्यहिजगतःप्राणआत्माहमितिब्रुवा
णंयदिब्रूयुरतिवाद्यसीतिवाढमतिवाद्यस्मीतिब्रूयान्नापह्नुवीतकस्माद्यसाव

प्रकुर्वातेयःप्राणंसर्वेश्वरमयमहमस्मीत्यात्मत्वेनोपगतः॥४॥१५॥सएषनारदः
सर्वातिशयंप्राणंस्वमात्मानंसर्वात्मानंश्रुत्वानातःपरमस्तीत्युपरराम।नपूर्वव
त्किमस्तिभगवःप्राणाद्भूयइतिपप्रच्छयतस्तमेवंविकारानृतब्रह्मज्ञानेनपरितुष्ट
मकृतार्थंपरमार्थसत्यातिवादिनमात्मानंमन्यमानंयोग्यंशिष्यंमिथ्याग्रहवि
शेषाद्विप्रच्याव्याहभगवान्सनत्कुमारः॥एषतुवाअतिवदतियमहंवक्ष्यामिन
प्राणविदतिवादीपरमार्थतोनामाद्यपेक्षंतुतस्यातिवादित्वंवस्तुभूमाख्यंसर्वा
तिक्रांतंतत्त्वंपरमार्थसत्यंवेदसोतिवादीत्यतआह।एषतुवाअतिवदतियःसत्ये
नपरमार्थसत्यविज्ञानवत्तयातिवदतिसोहंत्वांप्रपन्नोभगवन्सत्येनातिवदा
नितथामांनियुनक्तुभगवान्यथाहंसत्येनातिवदानीत्यभिप्रायः।एवंसत्येनातिव
दितुमिच्छसिसत्यमेवतुतावद्विजिज्ञासितव्यमित्युक्तआहनारदःसतथास्तुतर्हि
सत्यंभगवोविजिज्ञासेविशेषेणज्ञातुमिच्छेयंत्वत्तोहमिति॥४॥१६॥यदावैसत्यंपर
मार्थतोविजानातीदंपरमार्थतःसत्यमितिततोनृतंविकारजातंवाचारंभणंहित्वासर्

ववविकारावस्थंसदेवैकंसत्यमितितदेवाथवदतियद्वदतिनतुविकारोपिसत्यमे
वनामरूपेसत्यंताभ्यामयंप्राणश्छन्नःप्राणावैसत्यंतेषामेषसत्यमितिश्रुत्यंतरा
त्।सत्यमुक्तंसत्यत्वंश्रुत्यंतरेविकारस्यनतुपरमार्थापेक्षमुक्तंकिंतर्हिइंद्रियवि
षयाविषयत्वापेक्षं।किंतर्हिइंद्रियविषयाविषयत्वापेक्षंसच्चत्यंचेतिसत्यमित्यु
क्तं।तद्वारेणचपरमार्थसत्यस्योपलब्धिर्विवक्षितेतिप्राणावैसत्यंतेषामेषसत्यमि
तिचोक्तमिहापिचदृष्टमेव।यद्यपिप्राणविषयात्परमार्थसत्यविज्ञानाभिमाना
न्व्युत्थाप्यनारदंयत्सदेवसत्यंपरमार्थतोभूमाख्यंतद्विज्ञापयिष्यामीत्येषविशे
षतोविवक्षितार्थः।नाविज्ञानन्सत्यंवदति।यस्तुविज्ञानन्वदतिसोग्न्यादिदृष्टेना
ग्न्यादीन्परमार्थसद्रूपान्मन्यमानोवदतिनतुतेरूपत्रयव्यतिरेकेणपरमार्थतःसंति
तथातान्यपिरूपाणिसदपेक्षयानैवसंतीत्यतोनाविज्ञानन्सत्यंवदतिविज्ञानन्ने
वसत्यंवदतिनचसत्यविज्ञानमविजिज्ञासितमप्रार्थितंज्ञायतइत्याह।विज्ञानं
त्वेवविजिज्ञासितव्यमिति।यद्येवंविज्ञानंविज्ञानंभगवोविजिज्ञासइति।एवंम

त्यादीनांचोत्तरोत्तराणांकरोत्यंतानांसर्वस्यपूर्वहेतुत्वंव्याख्येयं॥भा॥१८॥यदावैमनुत
इति।मतिर्मननंतर्कोमंतव्यविषयआदरआस्तिक्यबुद्धिःश्रद्धानिष्ठागुरुशुश्रूषा
दितत्परत्वंब्रह्मविज्ञानाय॥१८॥१९॥२०॥ ॥भा॥यदावैकरोतिनिस्तिष्ठतीरिंद्रियसंय
मःचित्तैकाग्रताकरणंच।सत्यांहितस्यांनिष्ठादीनियथोक्तानिभवंतिविज्ञानाव
सानि॥भा॥२१॥सापिकृतिर्यदासुखंलभते।सुखंनिरतिशयंवक्ष्यमाणंलब्धव्यंम
येतिमन्यतेतदाभवतीत्यर्थः।यथादृष्टफलंसुखंप्रतिकृतिस्तथेहापि।नसुखंलब्ध्वा
करोति।भविष्यदपिफलंलब्धेत्यपेक्ष्यते।तदुत्तरप्रवृत्त्युपपत्तेः।अथेदानींकृत्यादि
सुखांतोत्तरेषुसत्सुसत्यंस्वयमेवप्रतिभासतेनतद्विज्ञायपृथग्यत्नःकार्यइतिप्रा
प्तंततइदमुच्यते।सुखंत्वेवविजिज्ञासितव्यमित्यादि।सुखंभगवोविजिज्ञासइति
अभिमुखीभूतायाह॥भा॥२२॥योवैभूमामहन्निरतिशयंबह्वितिपर्यायाःतत्सुखंत
तोर्वाक्सातिशयत्वादल्पमतस्तस्मिन्नल्पेनसुखंनास्त्यल्पस्याधिकतृष्णाहेतुत्वात्तृ
ष्णाचदुःखंनदुःखबीजंदृष्टंज्वरादिलोकेतस्माद्युक्तंनाल्पेसुखमस्तीति।अतोभूमै

वसुखंदृष्टाद्दुःखबीजत्वासंभवात्भूम्नः॥भा॥२३॥किंलक्षणोसौभूमेत्याह।यत्र
यस्मिन्भूम्निसतत्वेनान्यद्द्रष्टव्यमन्येनकरणेनद्रष्टान्योविभक्तोदृश्यात्पश्यति।त
थानान्यच्छृणोति।नामरूपयोरेवांतर्भावात्।विषयस्यभेदस्यतद्ग्राहकयोरेवहिदर्श
नश्रवणयोर्ग्रहणमन्येषांचोपलक्षणार्थत्वेन।मननंचात्रोक्तंद्रष्टव्यं।नान्यन्मनुतइ
तिप्रायशोमननपूर्वकत्वाद्विज्ञानस्य।तथानान्यद्विजानातिएवंलक्षणोयःसभूमा॥
किमत्रप्रसिद्धान्यदर्शनाभावोभूम्न्युच्यतेनान्यत्पश्यतीत्यादिना।अथान्यन्नपश्यत्या
त्मानंपश्यतीत्येतत्किंचातोयद्यन्यदर्शनाद्यभावमात्रमित्युच्यतेतदाद्वैतसंव्यवहार
विलक्षणोभूमेत्युक्तंभवति।अथान्यदर्शनविशेषप्रतिषेधेनात्मानंपश्यतीत्युच्यते
।तदैकस्मिन्नेवक्रियाकारकफलभेदोभ्युपगतोभवेद्यद्येवंकोदोषःस्यात्।नन्वय
मेवदोषःसंसारानिवृत्तिः।क्रियाकारकफलभेदोहिसंसारइत्यात्मैकत्वएवक्रियाका
रकफलभेदःसंसारविलक्षणइतिचेत्।आत्मनोविशेषैकत्वाभ्युपगमेदर्शनादिक्रि
याकारकफलभेदाभ्युपगमस्यशब्दमात्रत्वादन्यदर्शनाद्यभावोक्तिपक्षेपितत्रेत्यत्र

न्नपश्यतीतिच विशेषणेऽनर्थके स्यातामितिचेत्। दृश्यते हि लोके यत्रान्योऽन्यन्न
पश्यतीत्युक्ते स्तंभादीनात्मानं च न पश्यतीति गम्यते। एवमिहापीति चेत्। न। तत्त्वम
सीत्येकत्वोपदेशादधिकरणाधिकर्त्तव्यभेदानुपपत्तेः। तथा सदेकमेवाद्वितीयं सत्य
मिति षष्ठे निर्द्धारितत्वाददृश्येऽनात्म्ये न संदृशे तिष्ठति रूपमस्य विज्ञातारमरे केन वि
जानीयादित्यादिश्रुतिभ्यः स्वात्मनि दर्शनाद्यनुपपत्तिः। यत्रेति विशेषणमनर्थकं प्राप्त
मिति चेन्नाविद्याकृतभेदोपेक्षत्वाद्यथा सत्यैकत्वाद्वितीयत्वबुद्धिं प्रस्तुतामपेक्ष्य स
देकमेवाद्वितीयमिति संख्याद्यनर्हमप्युच्यते। एवं भूम्न्येकस्मिन्नेव यत्रेति विशेषण
मविद्यावस्थायामन्यदर्शनानुवादेन भूम्नस्तदभावलक्षणस्य विवक्षितत्वान्ना
न्यत्पश्यतीति विशेषणं। तस्मात्संसारव्यवहारो भूम्नि नास्तीति समुदायार्थो यत्रा
विद्याविषयेऽन्योऽन्येनान्यत्पश्यतीति तदल्पमविद्याकालभावीत्यर्थो यथा स्वप्नदृश्यं व
स्तु तत्कालभावीति तद्वत्तत एव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेव। तद्विपरीतो भूमा यस्त
दमृतं तच्छब्दोऽमृतत्वपरः। सतर्ह्येवंलक्षणो भूमा हे भगवन्कस्मिन्प्रतिष्ठित

इत्युक्तवंतं नारदं प्रत्याह सनत्कुमारः। स्वे महिम्नीति। स्वे आत्मीये महिम्नि माहात्म्ये वि
भूतौ प्रतिष्ठितो भूमा। यदि प्रतिष्ठामिच्छसि क्वचिद्यदि वा परमार्थमेव पृच्छसि न महि
म्न्यपि प्रतिष्ठित इति ब्रूमोऽप्रतिष्ठितोऽनाश्रितो भूमा क्वचिदपीत्यर्थः। यदि स्वमहिम्नि प्रति
ष्ठितो भूमा कथं तर्ह्यप्रतिष्ठ उच्यते। शृणु। गोअश्वादीह महिमेत्याचक्षते। गावश्चाश्वाश्च
गोअश्वं। द्वंद्वैकवद्भावः। सर्वत्र गवाश्वादि महिमेति प्रसिद्धं। तदाश्रितस्तत्प्रतिष्ठश्चैत्रो
भवति यथा। नाहमेवं स्वतोऽन्यं महिमानमाश्रितो भूमा चैत्रवदिति ब्रवीम्यत्र हे
तुत्वेनान्यो ह्यन्यो ह्यन्यस्मिन्प्रतिष्ठित इति व्यवहितेन संबंधः। किं त्वेवं ब्रवीमीति हो
वाच स एवेत्यादि॥ छ॥२४॥ कस्मात्पुनः क्वचिन्न प्रतिष्ठित इत्युच्यते। यस्मात्स एव भूमा
धस्तात्तद्व्यतिरेकेणान्यद्विद्यते यस्मिन्प्रतिष्ठितः स्यात्तथोपरिष्टादित्यादि समानं।
सति भूम्नोऽन्योऽन्यस्मिन्भूमा हि प्रतिष्ठितः स्यान्नतु तदस्ति। स एवेदं सर्वमतस्तस्मादसौ
न क्वचित्प्रतिष्ठितो यत्र नान्यत्पश्यतीत्यधिकरणाधिकर्त्तव्यतानिर्देशात्स एवाधस्ता
दिति परोक्षनिर्देशाच्च द्रष्टुर्जीवादन्यो भूमा स्यादित्याशंका कस्यचिन्मा भूदिति। अथा

तोनंतरमहंकारादेशोद्रष्टुरनन्यत्वदर्शनार्थंमिहैवनिर्दिश्यतेहंकारेणाहमेवाधस्ता
दित्यादिना।अहंकारेणादेशनादिसंघातोप्यादिश्यते।अविवेकिभिरित्यतस्तदाशंकामा
त्रमित्यथानंतरमात्मादेशआत्मनैवकेवलेनसत्स्वरूपेणशुद्धेनादिश्यते।आत्मै
वसर्वतःसर्वमित्येवमेकमजंसर्वतोव्योमवत्पूर्णमन्यशून्यंपश्यन्सवैएषविद्वा
न्मननविज्ञानाभ्यामात्मरतिरात्मन्येवरतीरमणंयस्यसोयमात्मरतिः।यथात्म
क्रीडोदेहमात्रसाधनारतिर्बाह्यसाधनाक्रीडालोकेस्त्रीभिःसखिभिश्चक्रीडतीति
दर्शनात्।नतथाविदुषः।किंतर्ह्यात्मविज्ञाननिमित्तमेवोभयंभवतीत्यर्थः।मिथु
नंद्वंद्वजनितंसुखंतदपिद्वंद्वनिरपेक्षंयस्यविदुषस्तथात्मानंदःशब्दादिनिमित्त
आनंदोविदुषांनतथायस्यविदुषःकिंतर्ह्यात्मनिमित्तमेवसर्वंसर्वदासर्वप्रकारे
णचदेहजीवितभोगादिनिमित्तबाह्यवस्तुनिरपेक्षइसएवंविलक्षणोविद्वान्जीव
न्नेवस्वाराज्येभिषिक्तःपतितेपिदेहेस्वराडेवभवति।यतएवंतस्यसर्वेषुलोकेषुका
मचारोभवति।प्राणादिषुपूर्वभूमिषुतत्रास्येतितावन्मात्रपरिच्छिन्नकामचारत्व

मुक्तमन्यराजत्वंचार्थप्राप्तंसातिशयत्वाद्यथाप्राप्तस्यास्वराज्यकामचारत्वानुवादे
नतन्निवृत्तिरिहोच्यते।सस्वराडित्यादिना।अथपुनर्येन्यथातउक्तदर्शनादन्य
थावैपरात्येनयथोक्तमेववासम्यग्नविदुस्तेन्यराजानोभवंति।अन्यःपरोराजास्वामी
येषांतेन्यराजानः।किंचाक्षय्यलोकाःक्षय्योलोकोयेषांतेक्षय्यलोकाभेददर्शन
स्याल्पविषयत्वादल्पंचतन्मर्त्यमित्यवोचामतस्माद्येद्वैतदर्शिनस्तेक्षय्यलोकाः
स्वदर्शनानुरूपेणैवभवंत्यतएवतेषांसर्वेषुलोकेष्वकामचारोभवति॥२॥२५॥
तस्यहवाएतस्येत्यादिस्वाराज्यप्राप्तस्यप्रस्तुतस्यविदुषइत्यर्थः।प्राक्सदात्मवि
ज्ञानात्स्वात्मनोन्यस्मात्सतःप्राणादेर्नामांतस्योत्पत्तिप्रलयावभूतां।सदात्मविज्ञा
नेतुसतीदानींस्वात्मतएवसंवृत्तौ।तथासर्वोप्यन्योव्यवहारआत्मतएवविदुषः।किं
चातदेतस्मिन्नर्थएषश्लोकोमंत्रोपिभवति।नपश्यःपश्यतीतिपश्योयथोक्तदर्शी
विद्वानित्यर्थः।मृत्युंमरणंरोगंज्वरादिदुःखतांदुःखभावंचापिनपश्यति।सर्वंह
सर्वमेवसपश्यःपश्यत्यात्मानमेवंसर्वंततःसर्वमाप्नोतिसर्वशःसर्वप्रकारैरिति॥

किंच।सविद्वान्प्राक्सृष्टिप्रभेदादेकधैवभवत्येकधैवचसन्त्रिधादिभेदैरनंतभे
दप्रकारोभवतिसृष्टिकाले।पुनःसंहारकालेमूलमेवस्वंपारमार्थिकमेकधाभा
वंप्रतिपद्यते।स्वतंत्रएवेतिविद्यांफलेनप्ररोचयन्स्तौति।अथेदानींयथोक्तायावि
द्यायाःसम्यगवभासकारकेसुखावभासकारणस्येवादर्शस्यविशुद्धिकारणंसा
धनमुपदिश्यते।आहारशुद्धावाह्रियतइत्याहारःशब्दादिविषयविज्ञानंभोक्तुर्भोग
याह्रियतेतस्यविषयोपलब्धिलक्षणस्यविज्ञानस्यशुद्धिराहारशुद्धिरागद्वेषमोह
दोषैरसंसृष्टंविषयविज्ञानमित्यर्थः।तस्यामाहारशुद्धौसत्यांतद्वतोंतःकरणस्य
सत्वस्यशुद्धिर्नैर्मल्यंभवति।सत्वशुद्धौचसत्यांयथागतेभूमात्मनिध्रुवाविछिन्ना
स्मृतिरविस्मरणंभवति।तस्यांचलब्धायांस्मृतिलंभेसतिसर्वेषामविद्याकृतान
र्थपाशरूपाणामनेकजन्मांतरानुभवभावनाकठिनीकृतानांहृदयाश्रयाणां
ग्रंथीनांविप्रमोक्षोविशेषेणप्रमोक्षणंविनाशोभवतीति।यतएतदुत्तरोत्तरंयथोक्त
माहारशुद्धिमूलंतस्मात्साकार्येत्यर्थः।सर्वंशास्त्रार्थमशेषतउक्त्वाख्यायिकामुप

संहरतिश्रुतिः।तस्मैमृदितकषायायवार्क्षादिरिवकषायोरागद्वेषादिदोषःसत्व
रंजनारूपत्वात्सज्ञानवैराग्याभ्यासरूपक्षारेणक्षालितोमृदितोविनाशितोय
स्यनारदस्यतस्मैयोग्यायमृदितकषायायतमसोविद्यालक्षणात्पारंपरमार्थत
त्वंदर्शयतिदर्शितवानित्यर्थः।कोसौभगवानुत्पत्तिंप्रलयंचैवभूतानामागतिंग
तिंवेत्तिविद्यामविद्यांचसवाच्योभगवानित्येवंसर्वासनत्कुमारस्तमेवसनत्कुमा
रंदेवस्कंदइत्याचक्षते॥कथयंतितद्विदोद्विवचनमध्यायपरिसमाप्त्यर्थं॥२६॥ ॥
॥७॥ ॥इतिश्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राजकाचार्य
स्यश्रीमच्छंकरभगवतःकृतौछांदोग्योपनिषद्विवरणेसप्तमःप्रपाठकः॥ ॥
यद्यपिदिग्देशकालादिभेदशून्यंब्रह्मसदेकमेवाद्वितीयमात्मैवेदंसर्वमितिष
ष्ठसप्तमयोरधिगतं॥तथापीहमंदबुद्धीनांदिग्देशादिभेदवद्वस्त्वितिभाविता
बुद्धिर्नशक्यतेसहसापिसतंपरमार्थविषयाकर्तुमित्यनधिगम्यब्रह्मनपुरुषार्थ
सिद्धिरितितदधिगमायहृदयपुंडरीकदेशउपदेष्टव्योयद्यपिसत्सम्यक्प्रत्ययैक

विषयंनिर्गुणंचात्मतत्त्वंतथापिमंदबुद्धीनांगुणवत्त्वस्येष्टत्वात्सत्यकामादिगुण
वत्त्वंचवक्तव्यं।तथायद्यपिब्रह्मविदांस्त्र्यादिविषयेभ्यःस्वयमुपरमोभवति।तथाप्यने
कजन्मविषयसेवाभ्यासजनिताविषयविषयातृष्णानसहसानिवर्तयितुंशक्यत
इतिब्रह्मचर्यादिसाधनविशेषोविधातव्यः।तथायद्यप्यात्मैकत्वविदांगंतृगमनगं
तव्याभावादविद्यादिदोषस्थितिनिमित्तक्षयेगगनइवविद्युदुद्भूतइववायुर्दग्धे
धनइवाग्निस्वात्मन्येवनिवृत्तिः।तथापिगंतृगमनादिवासितबुद्धीनांहृदयदेश
गुणविशिष्टब्रह्मोपासकानांमूर्धन्ययानाड्यागतिर्वक्तव्येत्यष्टमःप्रपाठकआ
रभ्यते॥ग॥दिग्देशगुणगतिफलभेदशून्यंहिपरमार्थसदद्वयंब्रह्ममंदबुद्धीनाम
सदिवप्रतिभाति।सन्मार्गस्थास्तावद्भवंतु।ततःशनैःपरमार्थसदपिग्राहयिष्यामीति
मन्यतेश्रुतिः।अथानंतरंयदिदंवक्ष्यमाणंदहरमल्पंपुंडरीकंपुंडरीकसदृशंवेश्म
इववेश्मद्वारपालादिमत्वादस्मिन्ब्रह्मपुरेब्रह्मणःपरस्यपुरंराज्ञोनेकप्रकृतिम
द्यथापुरंतथेदमनेकेंद्रियमनोबुद्धिभिःस्वाम्यर्थकारिभिर्युक्तमितिब्रह्मपुरंपुरे

चवेश्मराज्ञोयथातथातस्मिन्ब्रह्मपुरेशरीरेदहरंवेश्म।ब्रह्मणउपलब्ध्यधिष्ठानमित्य
र्थः।यथाविष्णोःशालिग्रामोस्मिन्हिस्वविकारशुंगेदेहेनामरूपव्याकरणायप्रवि
ष्टंसदाख्यंब्रह्मजीवेनात्मनेत्युक्तं।तस्मादस्मिन्हृदयपुंडरीकेवेश्मन्युपसंहृतक
रणैर्बाह्यविषयविरक्तैर्विशेषतोब्रह्मचर्यसत्यसाधनाभ्यांयुक्तैर्वक्ष्यमाणगुण
वद्ध्यायमानैर्ब्रह्मोपलभ्यतइतिप्रकरणार्थः।दहरोल्पतरोवेश्मनोल्पत्वाद्वेश्मनो
तराकाशआकाशाख्यंब्रह्म।आकाशोवैनामेतिश्रुत्याकाशइवाशरीरत्वा
त्सूक्ष्मत्वसर्वगतत्वसामान्याच्च।तस्मिन्नाकाशाख्येयदंतर्मध्येतदन्वेष्टव्यं।तद्वा
वतदेवचविशेषेणविजिज्ञासितव्यंगुर्वाश्रयश्रवणाद्युपायैरन्विष्यचसाक्षात्कर
णीयमित्यर्थः।तंचेदेवमुक्तवंतमाचार्यंयदिब्रूयुरंतेवासिनश्चोदयेयुः।कथंय
दिदमस्मिन्ब्रह्मपुरेपरिच्छिन्नेदहरंपुंडरीकंवेश्मततोप्यंतरल्पतरएवाका
शःपुंडरीकएववेश्मनितावत्किंस्यात्।किंततोल्पतरेयत्स्यादित्याहुः।दहरोस्मि
न्नंतराकाशःकिंतदत्रविद्यते।नकिंचनविद्यतइत्यभिप्रायोयदिनामबदरमात्रं

किमपि किं तस्यान्वेषणेन विजिज्ञासनेन वा फलं विजिज्ञासितुः स्यादतो यत्तत्रान्वेष
व्यं विजिज्ञासितव्यं वा न तेन प्रयोजनमित्युक्तवतः स आचार्यो ब्रूयादिति श्रुतेर्वच
नं। शृणु तत्र यत्पुंडरीकांतः खं स्यादल्पत्वात्। तच्छमल्पतरं स्यादिति तदसन्न हि
खं पुंडरीकवेश्मगतं पुंडरीकादल्पतरं मत्वावोचं दहरोस्मिन्नंतराकाश इति। किं
तर्हि पुंडरीकमल्पं तदनुविधायितच्छमंतःकरणं पुंडरीकाकाशपरिच्छिन्नं त
स्मिन्विशुद्धे संहृतकरणानां योगिनां स्वच्छ इवोदके प्रतिबिंबरूपमादर्श इव च
शुद्धे स्वच्छं विज्ञानज्योतिःस्वरूपावभासं तावन्मात्रं ब्रह्मोपलभ्यत इति दहरोस्मि
न्नंतराकाश इत्यवोचामांतःकरणोपाधिनिमित्तं स्वतस्तु यावान्वै प्रसिद्धः परिमा
णतोयमाकाशो भौतिकस्तावानेषोंतर्हृदय आकाशो यस्मिन्वतदन्वेष्टव्यं विजि
ज्ञासितव्यं चावोचाम। नास्याकाशतुल्यपरिमाणत्वमभिप्रेत्य तावानित्युच्यते। किं
तर्हि। ब्रह्मणोनुरूपस्य दृष्टांतांतरस्याभावात्कथं पुनर्नाकाशसमेव ब्रह्मेत्यवगम्य
ते। येनावृत्तं खं च दिवं मही च तस्माद्वा एतस्मादात्मन आकाशः संभूत एतस्मिन्नु

खल्वक्षरे गार्ग्याकाश इत्यादिश्रुतिभ्यः। किं चोभे अस्मिन्द्यावापृथिवी ब्रह्माकाशे
बुद्ध्युपाधिविशिष्टेंतरें च समाहिते सम्यगाहिते स्थिते। यथा चाग्निनानावित्युक्तं
हितयोर्नाव अग्निश्च वायुश्चेत्यादि समानं। यच्चास्यात्मन आत्मीयत्वेन देहवतो वि
द्यत इह लोके। तथा यच्च आत्मीयत्वेन विद्यते नष्टं न विष्यच्च नास्तीत्युच्यते। न
त्वस्यं तामवासन्नस्य दृष्ट्याकाशे समाधानानुपपत्तेः। तं चेदेवमुक्तवंतं ब्रूयुः पुन
रंतेवासिनोस्मिंश्चेद्यथोक्तं चेद्यदिदं ब्रह्मपुरोपलक्षितांतराकाशे इत्यर्थः। इदं स
र्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः कथमाचार्येणानुक्ताः कामा अंतेवासि
भिरुच्यते। नैष दोषः यच्चास्येहास्ति यच्च नास्तीत्युक्ता एवाचार्येण कामा अपि च
सर्वशब्देन चोक्ता एव कामाः यदा यस्मिन्काले एतच्छरीरं जरा वली पलितादिभिर्जी
र्णावयवोऽनिर्वाप्नोति शस्त्रादिना वा हतं प्रध्वंसते विस्रंसते विनश्यति किं ततो
ऽतिरिष्यते घटाश्रितक्षीरदधिस्नेहादिवत् घटनाशे देहनाशोपि देहा अथ यत्तत्परो
त्तरं ब्रह्म सर्वं नाशान्नश्यतीत्यभिप्राय एवं प्राप्ते नाशे किं तताद्यथोक्तादतिशिष्यते च

तिष्ठतनकिंचनावतिष्ठतइत्यभिप्रायः।एवमंतेवासिभिश्चोदितआचार्यःकथंब्रूया
त्तन्मतिमपनयन्।अस्यदेहस्यजरयैतत्यथोक्तमंतराकाशाख्यंब्रह्मयस्मिन्स
र्वंसमाहितंनजीर्यतिदेहवन्नविक्रियतइत्यर्थःनचास्यवधेनशस्त्रादिघातेनैतद्ध
न्यतेयथाकाशं।किमुततदपिस्पृष्टतरमशब्दमस्पर्शंब्रह्म।देहेंद्रियादिदोषैर्नस्पृ
श्यतइत्यर्थः।कथंदेहेंद्रियादिदोषैर्नस्पृश्यतइत्येतस्मिन्नवसरेवक्तव्यंप्राप्तं।त
त्प्रकृतव्यासंगोमाभूदितिनोच्यते।इंद्रविरोचनाख्यायिकायामुपरिष्टाद्वक्ष्यामोयु
क्तितः।एतत्सत्यमवितथंब्रह्मपुरंब्रह्मैवपुरंब्रह्मपुरं।शरीराख्यंतुब्रह्मपुरंब्रह्मो
पलब्ध्यर्थत्वात्।तत्त्वनृतमेववाचारंभणंविकारोनामधेयमितिश्रुतेः।तद्धिकारे
ऽनृतेपिदेहपुंडरीकेब्रह्मोपलभ्यतइतिब्रह्मपुरमित्युक्तंव्यावहारिकं।सत्यंतुब्रह्मपु
रमेतदेवब्रह्मसर्वव्यवहारास्पदत्वात्।अतोस्मिन्पुंडरीकोपलक्षितेसर्वेकामा
वहिर्निवर्द्धिःप्रार्थ्यंतेस्मिन्नेवस्वात्मनिसमाहिताःअतस्तत्प्राप्त्युपायमेवानुतिष्ठत
बाह्यविषयतृष्णांत्यजतेत्यभिप्रायः।एषआत्मातवतांस्वरूपंशृणुत।तस्यलक्षणं।

अपहतपाप्मा।अपहतःपाप्माधर्माधर्माख्योयस्यसोयमपहतपाप्मा।तथाविजरो
विगतजरोविमृत्युश्चोक्तंसर्वमिवनवधेनास्यहन्यतेकिमर्थंपुनरुच्यते।यद्यपिदे
हसंबंधिभ्यांजरामृत्युभ्यांनसंबध्यतेन्यथापिसंबंधःताभ्यांस्यादित्याशंकानिवृ
त्त्यर्थं।विशोकोविगतशोकः।शोकोनामेष्टादिवियोगनिमित्तोमानसःसंतापोविजि
घत्सोविगताशनेच्छोपिपासोऽपानेच्छः।नन्वपहतपाप्मत्वेनजरादयःशोकांताःप्र
तिषिद्धाःचभवंतिकारणप्रतिषेधात्।धर्माधर्मकार्याहितेइति।जरादिप्रतिषेधेन
वाधर्माधर्मयोःकार्याभावेविद्यमानयोरप्यसत्त्वमितिपृथक्प्रतिषेधोनर्थ
कःस्यात्।सत्यमेवं।तथापिधर्मकार्यानंदव्यतिरेकेणस्वाभाविकानंदोयथेश्वरे
विज्ञानमानंदमितिश्रुतेः।तथाधर्मकार्यजरादिव्यतिरेकेणापिजरादिदुःखस्वरूपं
स्वाभाविकंस्यादित्याशंक्यते।अतोयुक्तस्तन्निवृत्तयेजरादीनांधर्माधर्माभ्यांपृथ
क्प्रतिषेधोजरादिपदानांसर्वदुःखोपलक्षणार्थंपापनिमित्तानांतुदुःखानामानंत्या
त्प्रत्येकंचतत्प्रतिषेधस्याशक्यत्वात्सर्वदुःखप्रतिषेधार्थंयुक्तमेवापहतपाप्मत्व

वचनंसत्याअवितथाःकामायस्यसोयंसत्यकामोवितथाहिसंसारिणांकामाईश्व
रस्तुतद्विपरीतःतथाकामहेतवःसंकल्पाअपिसत्यायस्यससत्यसंकल्पःसंकल्पाः
कामाश्चशुद्धसत्वोपाधिनिमित्ताईश्वरस्यचित्रगवन्नस्वतोनेतिनेतीत्युक्तत्वात्॥
यथोक्तलक्षणएवात्माविज्ञेयोगुरुभ्यःशास्त्रतश्चात्मसंवेद्यतयाचस्वाराज्यकामै
र्नचेद्विज्ञायतेकोदोषःस्यादितिशृण्वत्रदोषंदृष्टांतेन।यथाह्येवेहलोकेप्रजाअ
न्वाविशंतिअनुवर्त्तंतेयथाशासनंयथेहप्रजाअन्यंस्वामिनंमन्यमानास्तस्यस्वामि
नोयथायथानुशासनंतथातथान्वाविशंति।किंयंयमंतंप्रत्यंतंजनपदंक्षेत्र
भागंचाभिकामाअर्थिन्योभवंत्यात्मबुद्ध्यनुरूपंतंतमेवचप्रत्यंतादिमुपजी
वंतीत्येषदृष्टांतोऽस्वातंत्र्यदोषंप्रतिपुण्यफलोपभोगेअथान्योदृष्टांतस्तद्द्वयं
प्रति।तद्यथेइत्यादि।तत्रयथेहलोकेतासामेवस्वाम्यनुशासनानुवर्त्तिनीनां
प्रजानांसेवादिजितोलोकःपराधीनोपभोगःक्षीयतेअंतवान्भवति।अथेदानीं
दार्ष्टांतिकमुपसंहरत्येवमेवामुत्राग्निहोत्रादिपुण्यजनितोलोकःपराधीनोपभो

गःक्षीयतएवेत्युक्तोदोषएषामितिविषयंदर्शयति।तद्यइत्यादिना।तत्रयेऽस्मिंल्लोके
ज्ञानकर्मणोरधिकृततायोग्याःसंतआत्मानंयथोक्तलक्षणंशास्त्राचार्योपदिष्टमननु
विद्ययथोपदेशमनुस्वसंवेद्यतामकृत्वाव्रजंतिदेहादस्मात्प्रयंतीत्येतांश्चयथो
क्तान्कामान्सत्यान्सत्यसंकल्पकार्यान्स्वात्मस्थान्कामाननुविद्यव्रजंति।तेषां
सर्वेषुलोकेषुअकामचारोऽस्वतंत्रताभवति।यथाराजानुशासनानुवर्त्तिवर्त्तनानांप्र
जानामित्यर्थोऽथयइहलोकेआत्मानंशास्त्राचार्योपदेशमनुविद्यस्वात्मसंवेद्यता
मापाद्यव्रजंतियथोक्तांश्चसत्यान्कामांस्तेषांसर्वेषुलोकेषुकामचारोभवतिराज्ञ
इवसार्वभौमस्येहलोके॥१॥कथंसर्वेषुलोकेषुकामचारोभवतीत्युच्यते।यआ
त्मानंयथोक्तलक्षणंहृदिसाक्षात्कृतवान्वक्ष्यमाणब्रह्मचर्यादिसाधनसंपन्न
संस्तत्स्थांश्चसत्यान्कामान्सत्यक्तदेहोयदिपितृलोककामःपितरोजनयितारःतए
वसुखहेतुत्वेनभोग्यत्वाल्लोकाउच्यंते।तेषुकामोयस्यातःपितृभिःसंबंधेच्छाय
स्यभवतितस्यसंकल्पमात्रादेवपितरःसमुत्तिष्ठंतिआत्मसंबंधितामापद्यंते॥

विशुद्धसत्वतयासत्यसंकल्पत्वादीश्वरस्येव।तेनपितृलोकेनसंपन्नःसंपत्तिरि
ष्टप्राप्तिस्तयासमृद्धोमहीयते।पूज्यतेवर्द्धतेवामहिमानमनुभवतिसमानमन्य
त्।मातरोजनयित्र्योताःसुखहेतुत्वकृताःसामर्थ्यान्नदुःखहेतुकृतास्तुयाम
त्कराद्विजन्मनिमित्तास्तुमात्रत्वविशुद्धसत्वस्ययोगिनइच्छासंबंधोवायुक्तो
यंयमंतंप्रदेशमभिकामोभवतिपंचकामंकामयतेयथोक्तव्यतिरेकेणापि
सोस्यांतप्राप्तुमिष्टःकामश्चसंकल्पादेवसमुत्तिष्ठतिश्चस्यतेनेच्छाविघातपत्ति
प्रेतार्थप्राप्त्याचसंपन्नोमहीयतइत्याद्युक्तार्थं॥१०॥२॥यथोक्तात्मध्यानसाधनानु
ष्ठानंप्रतिसाधकानामुत्साहजननार्थमनुक्रोशंत्याह।कष्टमिदंखलुवर्त्तते।य
त्स्वात्मस्थाशक्यप्राप्त्याअपितइमेसत्याःकामाअनृतापिधानात्तेषामात्मस्था
नांस्वाश्रयाणामेवसतामनृतंबाह्यविषयेषुस्त्र्यन्नभोजनाच्छादनादिषु
स्नातन्निमित्तंचस्वेच्छाप्रचारत्वंमिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते।त
न्निमित्तसत्यानांकामानामप्राप्तिरित्यपिधानमिवापिधानं।कथमनृतापिधा

ननिमित्तंतेषामलाभइत्युच्यतेयोयोहियस्मादस्यतःपुत्रोभ्रातावाइष्टइतोस्माल्लो
कात्प्रैतिप्रगच्छतिम्रियातंतमिहपुत्रंभ्रातरंवास्वहृदयाकाशेविद्यमानमपीह
पुनर्दर्शनायेच्छन्नपिनलभते।अथपुनर्येचास्यविदुषोजीवंतोहवाजीवंतीहपुत्रा
भ्रातादयोवायेचप्रेतामृताइष्टाःसंबंधिनोयच्चान्यदिहलोकेवस्त्रान्नपानादिरत्ना
दिवावस्त्विच्छन्नलभतेतत्सर्वमत्रहृदयाकाशाख्येब्रह्मणिगत्वायथोक्तेनविधि
नाविंदतेलभते।अत्रास्मिन्हार्दाकाशेहियस्माद्यथोक्ताःसत्याःकामावर्त्ततेनृतापि
धानाःकथमिवतदन्याप्यमित्युच्यतेतत्रयथाहिरण्यनिधिंहिरण्यमेवपुनर्यहिरण्य
यनिधानमिनिर्धीयतइतिनिधिःतंहिरण्यनिधिनिहितंभूमेरधस्तान्निहितंअक्षेत्र
ज्ञानिधिशास्त्रैर्निधिक्षेत्रमजानंतस्तेनिधेरुपर्युपरिसंचरंतोपिनिधिंनविंदयुःशक्यवे
दनमप्येवमिमाःआविद्यावत्यःसर्वाइमाःप्रजायथोक्तंहृदयाकाशाख्यंब्रह्मलोकंब्र
ह्मैवलोकस्तमहरहःप्रत्यहंगच्छंत्योपिसुषुप्तकालेनविंदंतिनलभंते।एषोहंब्रह्म
लोकनावमापन्नोस्म्यद्येत्यनृतेनहियथोक्तेनाहियस्मात्प्रत्यूढाहृतास्वरूपादविद्या

दोषैर्विहरिपत्त्वाद्वाइत्यर्थः॥अतःकष्टमिदंवर्त्ततेजंतूनांयत्स्वायत्तमपिब्रह्मनलभ्यत
इत्यभिप्रायः॥सवैएषआत्मापहतपाप्मेतिप्रकृतोवैशब्देनस्मारयत्येषविवक्षित
आत्माहृदिहृदयपुंडरीकेआकाशशब्देनाभिहितःतस्यैतस्यहृदयस्यैतदेवनिरु
क्तंनिर्वचनंनान्यत्॥हृद्ययमात्मावर्त्ततइतियस्मात्तस्माद्धृदयंहृदयनामनिर्वचनप्र
सिद्ध्यापिस्वहृदयेआत्मेत्यवगंतव्यमित्यभिप्रायः॥अहरहर्वैएवंवित्हृदय
मात्मेतिजानन्स्वर्गंलोकमेतीहाहंब्रह्मेतिप्रतिपद्यतेनन्वनेवंविदपिसुषुप्तकालेह
र्ब्रह्मप्रतिपद्यतएवसुषुप्तकालेसतासोम्यतदासंपन्नइत्युक्तत्वात्।बाढमे
वंतथाप्यस्तिविशेषोयथाजानन्नजानंश्चसर्वोजंतुःसद्ब्रह्मैवतथापितत्त्वमसी
तिप्रतिबोधितोविद्वान्सदेवनान्योस्मीतिविजानन्सदेवभवति।एवमेवविद्वानवि
द्वांश्चसुषुप्तेयद्यपिसत्संपद्यते।तथाप्येवंविदेवस्वर्गंलोकमेतीत्युच्यते।देहपातेपि
विद्याफलस्यावश्यंभावित्वादित्येषविशेषः॥सुषुप्तकालेस्वेनात्मनासतासंपन्नःस
न्सम्यक्प्रसादंतीतिजाग्रत्स्वप्नयोर्विषयेंद्रियसंयोगजातंकालुष्यंजहातीतिसं

प्रसादशब्दोयद्यपिसर्वजंतूनांसाधारणस्तथाप्येवंवित्स्वर्गंलोकमेतीतिप्रकृतत्वा
देषसंप्रसादइतिसंनिहितवद्यन्नविशेषात्सोप्येदंशरीरंहित्वास्माच्छरीरात्समुत्था
यशरीरात्मभावनांपरित्यज्येत्यर्थोनत्वासनादिवत्समुत्थायेतीह्युक्तं।स्वेनरूपेणे
तिविशेषणान्नह्यन्यत्तदुत्थायस्वरूपंसंपत्तव्यंस्वरूपमेवहितन्नभवतिप्रतिपत्त
व्यंचेस्यात्परंपरमात्मलक्षणंविज्ञप्तिस्वभावंज्योतीरूपसंपद्यस्वास्थ्यमुपगम्येत्ये
तत्स्वेनात्मायेनरूपेणाभिनिष्पद्यते।प्रागेतस्याःस्वरूपसंपत्तेरविद्ययादेहमेवापरं
रूपमात्मत्वेनोपगतइतितदपेक्षयेदमुच्यतेस्वेनरूपेत्यशरीरताह्यात्मनःस्वरू
पंयत्स्वंरूपंज्योतिःस्वरूपमापद्यतेसंप्रसादएषआत्मेतिहोवाचसब्रूयादितियः
श्रुत्याभियुक्तोंतेवासिभ्यःकिंचैतदमृतमविनाशिभूमायोवैभूमातदमृतमितिश्रु
तेः।अतएवाभयंद्वितीयाभावात्तएवब्रह्मेतितस्यहवाएतस्यब्रह्मणोना
माभिधानंकिंतत्सत्यमितितत्सत्यंह्यवितथंब्रह्म।तत्सत्यंसआत्मेतिह्युक्तं।अ
थकिमर्थमिदंनामपुनरुच्यते।तदुपासनविधिस्तुत्यर्थं।नानिहवाएतानिब्रह्मणो

नामाक्षराणित्रीण्येतानिसतीयमितिसकारस्तकारोयमितिचइकारस्तकारे
उच्चारणार्थोनुबंधोह्रस्वेणैवाक्षरेणपुनःप्रतिनिर्देशात्तेषांतत्रयत्सत्सकारः
सदमृतंसद्ब्रह्मामृतवाचकत्वात्।अमृतएवसंस्कारस्तकारांतोनिर्दिष्टः।अथय
त्तितकारःतन्मर्त्यमथयद्यमक्षरंतेनाक्षरेणामृतमर्त्याख्येस्वेउभेअक्षरेयच्छ
तियमयतिनियमयतिवशीकरोत्यात्मनेत्यर्थोयद्यस्मादनेनयमित्येतेनोभेयच्छ
नितस्माद्यंयतेऽवह्येतेनयमाक्षरेणेद्यतेब्रह्मनामाक्षरस्यापीदममृतत्वादिधर्म
वत्वंमहाभाग्यंकिमुतनामवतइत्युपास्यत्वायस्तूयतेब्रह्मनामनिर्वचनेनैवना
मवतोवेत्तैवंविदहरहर्वाएवंवित्स्वर्गंलोकमेतीत्युक्तार्थं॥५॥३॥अथयआत्मोक्त
लक्षणोयःसंप्रसादस्यस्वरूपंवक्ष्यमाणैरुक्तैरनुक्तैश्चगुणैःपुनःस्तूयतेब्रह्मचर्य
साधनसंबंधार्थं।सयएषोयथोक्तलक्षणआत्मासमेतुरिवसेतुर्विधृतिर्विधरणः
तेनहिसर्वंजगद्वर्णाश्रमादिक्रियाकारकफलादिभेदनियमैःकर्त्रनुरूपंविदधता
विधृतमाध्रियमाणंह्यीश्वरेणेदंविश्वंविनश्येत्।यतःतस्मात्ससेतुर्विधृतिःकिमर्थंसे

सेतुरित्याह।तेषांभूरादीनांलोकानांकर्तृकर्मफलाश्रयाणामसंभेदायाविदारणायवि
नाशायेत्येतत्।किंविशिष्टश्चासौसेतुरित्याह।तेषांभूरादीनांलोकानांकर्तृकर्मफलाश्र
याणामसंभेदायाविदारणायविनाशायेत्येतत्।किंविशिष्टश्चासौसेतुरित्याह।नैतंसे
तुमात्मानमहोरात्रेसर्वस्यजनिमित्तःपरिच्छेदकेसतीनैतंतरतोयथान्यंसंसारिणःका
लेनाहोरात्रादिलक्षणेनपरिच्छिद्यानतथायंकालपरिच्छेद्यइत्यभिप्रायोयस्मादृवकिं
वत्सरोहोभिःपरिवर्तनंशतसुत्पंतदादृतएवैनंनजरातरतिनप्राप्नोतितथाप्नोति
नमृत्युर्नशोकोनसुकृतंनदुःकृतंनसुकृतदुःकृतेधर्माधर्मौ॥प्राप्तिरत्रगमनादेना
न्निनेतानातिक्रमणंकारणंह्यात्मानशक्यंहिकारणातिक्रमणंकर्तुंकार्येणाहोरा
त्रादिचसर्वंमतःकार्यमन्येनत्वन्यस्यप्राप्तिरतिक्रमणंवाक्रियेतनत्वनेनैवत
स्यनहिघटेनमृत्प्राप्यतेतिक्रम्यतेवायद्यपिसर्वंयदात्मापहतपाप्मेत्यादिना
पाप्मादिप्रतिषेधउक्तएवतथापीहायंविशेषोनतरतीतिप्राप्तिविषयत्वंप्रतिषि
ध्यतेतत्राविशेषेणजराद्यभावमात्रमुक्तमहोरात्राभ्यामुक्ताअनुक्ताश्चान्येसर्वे

पाप्मानउच्यंतेतोस्मादात्मनःसेतोर्निवर्त्तंते।अप्राप्यैवेत्यर्थोपहतपाप्माह्येषब्र
ह्मलोकोब्रह्मलोकउक्तोयस्माद्धपाप्मकार्यमांध्यादिशरीरवतःस्यान्नत्वशरी
रस्यतस्माद्वैएतमात्मानंसेतुंतीर्त्वाप्राप्यानंधोभवतिदेहवत्वसर्वमंधोपिसन्
तथाविद्धःसन्देहवत्वेमदेहवियोगेसेतुंप्राप्याविद्धोभवतितथोपतापिरोगाद्यु
पतापवान्सन्ननुपतापीभवतिकिंचयस्मादहोरात्रेनस्तःसेतौ।।तस्माद्वाएतं
सेतुंतीर्त्वाप्राप्यनक्तमपितमोरूपंरात्रिरपिसर्वमहरेवाभिनिष्पद्यतेविज्ञस्यात्मज्यो
तिस्वरूपमहरिवाहःसदैकरूपंविदुषःसंपद्यतइत्यर्थः।सकृद्विभातःसदाविभा
तःसदैकरूपःस्वेनरूपेणैषब्रह्मलोकःतत्रैवंसत्येतंयथोक्तंब्रह्मलोकंब्रह्मच
र्येणस्त्रीविषयतृष्णात्यागेनशास्त्राचार्योपदेशमनुविंदंतिस्वात्मसंवेद्यतामापादयं
तितेषामेवंब्रह्मचर्यसाधनवतांब्रह्मविदामेषब्रह्मलोकोनान्येषांस्त्रीविषय
संपर्कजाततृष्णानांब्रह्मविदामपीत्यर्थः।तेषांसर्वेषुलोकेषुकामचारोभवती
त्युक्तार्थं।तस्मात्परममेतत्साधनंब्रह्मचर्यंब्रह्मविदामित्यभिप्रायः।।३।।४।।यज्ञ

त्मासेतुत्वादिगुणैस्तुतस्त्वात्मातस्यज्ञानसहकारिसाधनांतरंब्रह्मचर्यंविधा
तव्यमित्याह।यज्ञादिभिश्चतस्तौतिकर्त्तव्यार्थं।अथयद्यज्ञइत्याचक्षतेलोकेपर
मपुरुषार्थसाधनंकथयंतिशिष्टाःतद्ब्रह्मचर्यमेवयज्ञस्यापियत्फलंतद्ब्रह्मचर्य
वांल्लभते।ततोयज्ञोपिब्रह्मचर्यमेवेतिप्रतिपत्तव्यंकथंब्रह्मचर्यंयज्ञइत्याह।ब्र
ह्मचर्येणैवहियस्माद्योज्ञातासतंब्रह्मलोकंयज्ञस्यापिपारंपर्येणफलभूतंविंद
तेलभते।ततोयज्ञोपिब्रह्मचर्यमेवेति।योज्ञातेत्यक्षरानुवृत्तेर्यज्ञोब्रह्मचर्यमेव।
अथयदिष्टमित्याचक्षते।ब्रह्मचर्यमेवतत्कथंब्रह्मचर्येणैवसाधनेनतमीश्वर
मिष्ट्वापूजयित्वाथवेषणामात्मविषयांकृत्वातमात्मानमनुविंदतेएषणाद्दिष्टम
पिब्रह्मचर्यमेवअथयत्सत्रायणमित्याचक्षते।ब्रह्मचर्यमेवतत्तथासतःपरस्मादात्मन
आत्मनस्त्राणंरक्षणंब्रह्मचर्यसाधनेनविंदतेतःसत्रायणशब्दमपिब्रह्मचर्यमेव
तदथयन्मौनमित्याचक्षतेब्रह्मचर्यमेवतद्ब्रह्मचर्येणैवसाधनेनयुक्तःसन्नात्मा
नंशास्त्राचार्याभ्याममनुविद्यपश्चान्मनुतेध्यायत्यतोमौनशब्दमपिब्रह्मचर्यमेवाथय

दनाशकायनमित्याचक्षतेब्रह्मचर्यमेवतद्यमात्मानंब्रह्मचर्येणानुविंदतेसए
षह्यात्माब्रह्मचर्यसाधनवतोननश्यतितस्माद्नाशकायनमपिब्रह्मचर्यमेवाथ
यदरण्यायनमित्याचक्षते।ब्रह्मचर्यमेवतदरण्यशब्दयोरण्वियोर्ब्रह्मचर्यवतो
ऽयनादरण्यायनंब्रह्मचर्यंयोन्यानाद्युक्तएषणादिर्हिंसंतःस्त्रीणान्मत्रायणंमनना
न्मौनमनशनाद्नाशकायनमरण्ययोर्गमनादरण्यायनमित्यादिनिर्महद्भिःपुरुषा
र्थसाधनैःस्तुतत्वाद्ब्रह्मचर्यंज्ञानसहकारिकारणसाधनमित्यतोब्रह्मविदायत्न
तोरक्षणीयमित्यर्थः।तत्रतद्धिब्रह्मलोकेअरश्चहवैप्रसिद्धोण्यश्चार्णवौसमुद्रौ
समुद्रोपमौवासरसी।तृतीयस्यांभुवमंतरिक्षंचापेक्ष्यतृतीयाद्यौस्तस्यांतृतीयस्या
मितोस्माल्लोकाद्गण्यमानायांदिवितत्तत्रैवमैवैरमिरान्नंतन्मयऐरोमंडःते
नपूर्णमिरंमदीयंतदुपयोगिनांमदकरंहर्षोत्पादकंसरस्तत्रैवचाश्वत्थोहत्त्वांसोम
सवनोनामतःसोमोमृतंतन्निस्रवोमृतस्रवइतिवातत्रैवचब्रह्मलोकेब्रह्मचर्यसाध
नरहितैर्ब्रह्मचर्यसाधनवद्भ्योन्यैर्नजीयतइत्यपराजितानामपूःपुरीब्रह्मणोहिर

ण्यगर्भस्यब्रह्मणाचप्रभुणाविशेषेणमितंनिर्मितंतच्छुद्धिरण्मयंसौवर्णंप्रभुविमितंम
ण्डपमितिवाक्यशेषः।तत्तत्रब्रह्मलोकेएतावर्णवौयावरण्याख्यौब्रह्मचर्येणसा
धनेनानुविंदंतियेतेषामेवैषोविषयोव्याख्यातोब्रह्मलोकस्तेषांचब्रह्मचर्यसाधन
वतांब्रह्मविदांसर्वेषुलोकेषुकामचारोभवति।नान्येषामब्रह्मचर्यपराणांबाह्यवि
षयासक्तबुद्धीनांकदाचिदपीत्यर्थःनित्वामिदंस्वयमस्त्वंवरुणइत्यादिनियंथाकथि
स्यतेमहदाह्एवमिष्टानिनिशब्दैर्नस्त्वाविषयत्स्नानिहान्निमात्रंस्तुत्यर्थःकिंतर्हिज्ञान
स्यमोक्षसाधनत्वात्तद्देवेष्टादिनिस्तूयतइतिकेचित्।न।स्यादिबाह्यविषयरत्नाप
हृतचित्तानांप्रत्यगात्मविवेकविज्ञानानुपपत्तेःपरांचिखानिव्यतृणत्स्वयंभूस्तस्मा
त्पराङ्पश्यतिनांतरात्मन्नित्यादिश्रुतिस्मृतिशतेभ्योज्ञानसहकारिकारणंस्त्र्यादिविषय
तृष्णानिवृत्तिसाधनंविधातव्यमेवेतियुक्तेवतच्छ्रुतिर्नतुयज्ञादिभिःस्तुतंब्रह्मचर्यमि
तियज्ञादीनांपुरुषार्थसाधनत्वंगम्यते।सत्यं।गम्यते।सत्यं।गम्यतेनत्विहब्रह्मलोकंप्र
तियज्ञादीनांसाधनत्वमभिप्रेत्ययज्ञादिभिर्ब्रह्मचर्यंस्तूयते।किंतर्हितेषांप्रसिद्धंपुरु

बाह्यसाधनमपेक्ष्ययथेंद्रादिनाराज्ञा।ननुयत्रेंद्रादीनांव्यापारःतत्रैवराज्ञइतितद्वत्।यद्
मेणंविद्ब्राह्मलौकिकाःसंकल्पजाश्चपैत्रादयोभोगाःस्तोकिंपार्थिवाआप्याश्चस्थूलास्सु
ईश्याकाशेसमाधानानुपपत्तिःपुराणेचमनोमयेलोकेदृश्यंतेतद्वदेवतत्रसःस्व
र्णमिंउपान्याशेत्सिन्मानसप्रत्ययमात्राणीति।किंचानायदिपार्थिवाआप्याश्चस्थूलास्सु
ईश्याकाशेसमाधानानुपपत्तिःपुराणेचमनोमयानिब्रह्मलोकेशरीरादीनिनिवाक्यं
विरुध्येत।अशोकमहिमेत्याद्या।स्वस्तुतयोनतुसमुद्राःसरितःसरांसिवाप्यःकूपायज्ञा।
वेदामंत्रादयश्चमूर्तिमंतोब्रह्माणमुपतिष्ठंतइतिमानसत्वेविरुध्येतपुराणस्मृतिः।न।
मूर्तिमत्वेप्रसिद्धरूपाणामेवतत्रगमनानुपपत्तेः।तस्मात्प्रसिद्धरूपव्यतिरेकेणसाग
रादीनांमूर्त्यंतरंसागरादिनिरूपात्तंब्रह्मलोकगंतृकल्पनीयंतुल्यायांचकल्पनायांप्रथ
थाप्रसिद्धाएवमानस्यआकारवत्योमूर्त्तयोयुक्ताःकल्पयितुंमानमदेहरूपसंबंधोप
पत्तेःदृष्टादिमानस्यएवाकारवत्यःपुंस्याद्यामूर्त्तयःस्वप्नेनतुअमृताएवतइमेसत्याःका
माइतिश्रुतिस्तथासतिविरुध्येत।न।मनसःसप्रत्ययस्यसत्वोपपत्तेःमानसादिप्रत्यया

स्तेपुरुषाद्याकाराःस्वप्नेदृश्यंते।ननुजाग्रद्वासनारूपाःस्वप्नदृश्याःननुतत्रस्यादृश
यःस्वप्नेविद्यंते।अत्यल्पमिदमुच्यते।जाग्रद्विषयाअपिमानसप्रत्ययाभिनिर्वृत्ताएव।
सदीक्षाभिनिर्वृत्ततेजोबन्नमयत्वात्।जाग्रद्विषयाणां।संकल्पमूलाहिलोकाइतिचोक्तं।
समवक्लृपतांद्यावापृथिवीइत्यत्रसर्वश्रुतिषुप्रत्ययात्मनउत्पत्तिःप्रानयश्चतत्रैवस्थिति
श्चयथावाअरानाभावित्यादिनोच्यते।तस्मान्मानसानांबाह्यानांचविषयाणामितरेत
रकार्यकारणमिष्टएवबीजांकुरवद्यद्यपिबाह्याएवमानासामानसाएवचबाह्या
नानृतत्वंतेषांकदाचिदपिस्वात्मवति।ननुस्वप्नेःदृष्टाःप्रतिबुद्धस्यानृताभवंतिविष
याःसत्यमेवं।जाग्रद्बोधापेक्षंतुतदनृतत्वंनस्वतःतथास्वप्नबोधापेक्षंचजाग्रद्दृष्ट
विषयानृतत्वंनस्वतोविशेषाकारमात्रंतुसर्वेषांमिथ्याप्रत्ययनिमित्तमिति।वाचारं
नणंविकारोनामधेयमनृतंत्रीणिरूपाणीत्येवसत्यंतान्यप्याकारविशेषतोनृतंस
तःसन्मात्ररूपतयासत्यं।प्राक्तदात्मप्रतिबोधात्स्वविषयेपिसर्वंसत्यमेवस्वप्नदृश्या
इवेतिनकश्चिद्विरोधः।तस्मान्मानसाएवब्राह्मलौकिकाअरण्यादयःसंकल्पजाःपित्रा

दयः कामा बाह्यविषयभोगवदशुद्धिरहितत्वाच्छुद्धसत्त्वसंकल्पजन्या इति निरतिश
यसुखाः सत्याः स्वेनरूपेणभवंतीत्यर्थः। तत्सत्यात्मप्रतिबोधेपिरज्ज्वामिवकल्पिताः
सर्पादयः सदात्मस्वरूपत्वामेवप्रतिपद्यंतेसदात्मनासत्याएवभवंति॥५॥ यस्तुहृ
दयपुंडरीकगतंयथोक्तगुणविशिष्टंब्रह्मब्रह्मचर्यादिसाधनसंपन्नस्त्यक्तबाह्यवि
षयानृततृष्णः संनुपास्तेतस्येयंमूर्धन्यानाड्यागतिर्वक्तव्येतितिखंडआरभ्यते। अथ
याएतावक्ष्यमाणाहृदयस्यपुंडरीकाकारस्यब्रह्मोपासनस्थानस्यसंबंधिन्योनाड्यो
हृदयमांसपिंडात्सर्वतोविनिःसृताआदित्यमंडलादिवरश्मयस्ताश्चैताः पिंगलस्य
वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्यपूर्णास्तदाकाराएवतिष्ठति॥ वर्त्तंतइत्य
र्थः। तथाशुक्लस्यनीलस्यपीतस्यलोहितस्यरसस्यपूर्णाइतिसर्वत्राध्याहार्यं। तदेवच
कफभूयस्त्वाच्छुक्लंकफेनसमतायांपीतंसौरेणतेजसापित्ताख्येनपाकाभिनिर्वृत्तंन
कफेनाल्पेनसंपर्कात्पिंगलंभवतिसौरंतेजः पित्ताख्यंतदेवचवातभूयस्त्वान्नी
लंभवति। तदेवचकफभूयस्त्वाच्छुक्लंकफेनसमतायांपीतंशोणितबाहुल्येनलोहि

तं। वैदिकाह्यावर्णविशेषाअन्वेष्टव्याः॥ कथंभवतीतिश्रुतिस्त्वादित्यसंबंधादेवत्वा
त्तेजसोनाडीष्वनुगतस्यैतेवर्णविशेषाइति। कथं। असौवाआदित्यः पिंगलोवर्णतएषआ
दित्यः शुक्लोप्येषनीलएषपीतएषलोहितआदित्यएव। तस्याध्यात्मंनाडीभिः कथंसंबं
धइत्यत्रदृष्टांतमाह॥ तत्तत्रयथालोकेमहान्विस्तीर्णः पंथामहापथआततोव्याप्तउभौ
ग्रामौगच्छतीमंचसंनिहितममुंचविप्रकृष्टंदूरस्थमेवंयथादृष्टांतोमहापथउभौग्रामौ
प्रविष्टएवमेवैताआदित्यरश्मयउभौलोकौआदित्यमंडलमिमंचपुरुषंगच्छंत्युभ
यत्रप्रविष्टाः यथामहापथः कथममुष्मादादित्यमंडलात्प्रतायंतेसंततामवंतिअध्या
त्ममस्मिन्पिंगलादिवर्णासुयथोक्तासुनाडीषुसृप्तागताः प्रविष्टाइत्यर्थः। आभ्योनाडीभ्यः
प्रतायंतेप्रवृत्ताः संतानभूताः सत्यः तेमुष्मिन्रश्मीनांपुंल्लिंगत्वात्तेइत्युच्यंते। तत्र
त्रैवंसतियत्रयस्मिन्कालेयंजीवः सुप्तोभवतिस्वापस्यहिप्रकारत्वाद्विशेषणंसमस्त
इत्युपसंहृतसर्वकरणवृत्तिरित्येतत्ततोबाह्यविषयसंपर्कजनितकालुष्याभावात्स
म्यक्प्रसन्नोभवति। अतएवस्वप्नंविषयाकाराभासंमानसंस्वप्नप्रत्ययंनविजानाति

नानुभवतीत्यर्थो यदैवं सुप्तो भवति। आसु सौरतेजःपूर्णासु यथोक्तासु नाडीषु तदासु
सृप्तः प्रविष्टो नाडीभिर्द्वारभूताभिर्हृदयाकाशं गतो भवतीत्यर्थः। नह्यन्यत्र संपन्नः स्वप्ना
दर्शनमस्ति। नासामध्यान्नाडीष्विति सप्तमी तृतीया परिणम्यते। तं सतासंपन्नं न कश्चन
कश्चिदपि धर्माधर्मरूपः पाप्मा स्पृशति। निःस्वरूपावस्थितत्वादात्मनो देहेंद्रियविशिष्टं
सुखदुःखकार्यप्रधानेन पाप्मा स्पृशतीति। न तु सत्संपन्नं स्वरूपावस्थं। कश्चिदपि पाप्मा
स्पृष्टुमुत्सहते विषयत्वात्। अन्यो ह्यन्यस्य विषयो भवति। न त्वन्यत्वं केनचित्कुतश्चिद
पि सत्संपन्नस्य स्वरूपप्रच्यवनं त्वात्मनो जाग्रत्स्वप्नावस्थां प्रतिगमनं बाह्यविषय
प्रतिबोधो ऽविद्याकामकर्मबीजस्याब्रह्मविद्याङ्कुलाशादाद निमित्तमित्यवोचाम
षष्ठ एव। तदिहापि प्रत्येतव्यं। यदैवं सुप्तः सौरेण तेजसा नाड्यंतर्गतेन सर्वतः संपन्नो
व्याप्तो भवति। अतो विशेषेण चक्षुरादिनाडीद्वारैर्बाह्यविषयभोगाय प्रवृत्तानि कर
णानि अस्य तदा भवंति तस्मादयं करणानां निरोधात्स्वात्मन्येवावस्थितः स्वप्नं न विजा
नातीति युक्तं। तत्रैवं सत्यथ यत्र यस्मिन्काले ऽबलिमानमबलत्वं देहस्य रोगा

दिनिमित्तं जरादिनिमित्तं वा कृशीभावमयं नीतः प्रापितो देवदत्तो भवति मुमूर्षुर्यदा भव
तीत्यर्थः तमभितः सर्वतो वेष्टयित्वा आसीना ज्ञातय आहुः जानासि मां तव पुत्रं जानासि
मां पितरं चेत्यादि स मुमूर्षुर्यावदस्माच्छरीरादनुत्क्रांतो अनिर्गतो भवति तावत्पुत्रादीञ्जा
नाति। अथ यत्र यदैतत्क्रियाविशेषणमित्यस्माच्छरीरादुत्क्रामति॥ अथ तदैतैरेव यथोक्ता
भिरश्मिभिरूर्ध्वमाक्रमते यथाकर्मार्जितं लोकं प्रत्यविद्वान् इतरस्तु विद्वान्यथोक्तसाध
नसंपन्नः॥ ओमित्योंकारेणात्मानं ध्यायन्यथास्वं वा ह एवमूर्ध्वं वा विद्वांश्चेदितरथाति
र्यग्वेत्यभिप्रायो मीयते प्रमीयते गच्छतीत्यर्थः॥ स विद्वानुत्क्रमिष्यन्यावत्क्षिप्येन्मनो या
वता कालेन मनसः क्षेपः स्यात्तावता कालेनादित्यं गच्छति प्राप्नोति क्षिप्रं गच्छ
तीत्यर्थो न तु तावतैव कालेनेति विवक्षितं। किमर्थमादित्यं गच्छतीत्युच्यते। एतद्वै खलु प्र
सिद्धं ब्रह्मलोकस्य द्वारं यं आदित्यस्तेन द्वारभूतेन ब्रह्मलोकं गच्छति विद्वानतो विदुषां
प्रपदनं प्रपद्यते ब्रह्मलोकमनेन द्वारेणेति प्रपदनं निरोधं निरोधाय स्मादादित्याद वि
दुषां भवतीति निरोधः। सौरेण तेजसा देहे एवं निरुद्धाः संतो मूर्धन्यानाड्या नोत्क्रमंत्य

वेत्यर्थोविष्वङ्ङ्न्या इतिश्लोकात्तदेतस्मिन्यथोक्तेऽर्थेएषश्लोकोमंत्रोभवति।शतंचैका
चैकोत्तरशतंनाड्योहृदयस्यमांसपिंडभूतस्यसंबंधिन्याःप्रधानतोभवंत्यानंत्या
द्देहनाडीनां।तासामेकामूर्धानमभिनिःसृताविनिर्गता।तयोर्ध्वमायन्गच्छन्नमृत
त्वममृतभावमेति।विष्वङ्नानागतयस्तिर्यग्विसर्पिण्यउत्क्रमणेगाश्चान्यानाड्योभवं
तिसंसारगमनद्वारभूतानामृतत्वाय।किंतर्ह्युत्क्रमणएवोत्क्रांत्यर्थमेवभवंतीत्य
र्थोद्विरभ्यासप्रकरणसमाप्त्यर्थः॥५॥६॥अथयएषसंप्रसादोऽस्माच्छरीरात्समुत्था
यपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतएषआत्मेतिहोवाचैतदमृतमभृत
मभयमेतद्ब्रह्मेत्युक्तं।तत्रकोऽसौसंप्रसादःकथंवातस्याधिगमः।यथासोऽस्माच्छरी
रात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेयेनस्वरूपेणाभिनिष्प
द्यतेसकिंलक्षणआत्मासंप्रसादस्यचादेहसंबंधीनिपररूपापत्तितोयदन्यत्कथं
स्वरूपमित्येतेऽर्थावक्तव्याइत्युत्तरोग्रंथआरभ्यते।आख्यायिकातुविद्याग्रहणसंप्र
दानविधिप्रदर्शनार्था।विद्यास्तुत्यर्थाचिराजसेवितंपानीयमितिवत्।यआत्माऽपहतपा

प्माविजरोमृत्युर्विशोकोविजिघत्सोपिपासःसत्यकामःसत्यसंकल्पः॥यस्योपासना
योपलब्धयेहृदयपुंडरीकमभिहितंयस्मिन्कामाःसमाहिताःसत्याअनृतापिधानाः
यदुपासनसहभाविब्रह्मचर्यसाधनमुक्तं।उपासनफलभूतकामप्रतिपत्तयेचमूर्द्ध
न्यानाड्यागतिरभिहिता।सोऽन्वेष्टव्यःशास्त्राचार्योपदेशैर्ज्ञातव्यःसविशेषेणज्ञातुमेष्ट
व्योविजिज्ञासितव्यःस्वसंवेद्यतामापादयितव्यः।किंतस्यान्वेषणाद्विजिज्ञासनाच्चस्या
दित्युच्यतेससर्वांश्चलोकानाप्नोतिसर्वांश्चकामान्यस्तमात्मानंयथोक्तेनप्रकारेणशास्त्रा
चार्योपदेशेनान्विष्यविजानातिस्वसंवेद्यतामापादयतितस्यैतत्सर्वलोककामावा
प्तिःसर्वात्मनाफलंभवतीतिहकिलप्रजापतिरुवाचान्वेष्टव्योविजिज्ञासितव्यइतिचै
षनियमविधिर्नापूर्वविधिरेवमन्वेष्टव्योविजिज्ञासितव्यइत्यर्थः।दृष्टार्थत्वादन्वेषण
विजिज्ञासनयोर्दृष्टार्थत्वंचदर्शयिष्यतिनाहमत्रभोग्यंपश्यामीत्यनेनासकृदुक्त्यरक्ष
पेणचदेहादिधर्मैरेवगम्यमानस्यात्मनःस्वरूपाधिगमेविपरीताधिगमनिवृत्तिर्दृष्टं
फलमितिनियमार्थः।नैवास्यविधेर्युक्तानत्वग्निहोत्रादीनामिवापूर्वविधित्वमिरुसंभ

वतितद्योभयइत्याख्यायिकाप्रयोजनमुक्तं।तद्धकिलप्रजापतेर्वचनमुभयेदेवासुरा
देवाश्चासुराश्चसुराअनुपरंपरागतस्वकर्णगोचरापन्नमनुबुबुधिरेबुद्धवंतःतेच
प्रजापतिवचोबुध्वाकिमकुर्वन्नित्युच्यते॥तेहोचुरुक्तवंतोन्योन्यंदेवाश्चपरिपश्चसुरा
श्चहंतयद्यनुमतिर्भवतांप्रजापतिनोक्तमात्मानमन्विच्छामोन्वेषणंकुर्मोयमात्मा
नमन्विष्यसर्वांश्चलोकानाप्नोतिसर्वांश्चकामानित्युक्त्वाइंद्रोहइवराजैवस्वयंदेवाना
मितरान्देवांश्चभोगपरिछदंचसर्वंस्थापयित्वाशरीरयात्रेणैवप्रजापतेःप्रत्यभिप्र
वव्राजप्रगतवांस्तथाविरोचनोसुराणांविनयेनगुरवोभिगंतव्याइत्येतद्दर्शयतित्रै
लोक्यराज्याद्गुरुतराविद्येतियतोदेवासुरराजौतथाईनोचाहौसंतौतथागुरुमभ्यु
पगंतवंतौ।ताहकिलासंविदानावेवान्योन्यंसंविदमकुर्वाणौविद्याफलंप्रत्यन्योन्य
मीर्ष्यांदर्शयंतौसमित्पाणीसमिद्भारहस्तौप्रजापतिसकाशमाजग्मतुरागतवंतौतौ
हगत्वाद्वात्रिंशतंवर्षाणिशुश्रूषापरौभूत्वाब्रह्मचर्यमूषतुरुषितवंतौअभिप्रायज्ञः
प्रजापतिस्तावुवाचकिमिछंतौकिंप्रयोजनमभिप्रेत्येछंतावत्स्थमुषितवंतौयुवा

मानित्युक्तौतौहोचतुः।यःआत्मेत्यादिभगवतोवचोवेदयंतेशिष्टाअतस्तमात्मानंज्ञा
तुमिछंतोअवात्स्वमिति।यद्यपिप्राक्प्रजापतेःसमीपागमनादन्योन्यमीर्ष्या
युक्तावभूतां।तथापिविद्याप्राप्तिप्रयोजनगौरवात्यक्तरागद्वेषमोहेर्ष्यादिदोषावेव
भूत्वोपेतुर्ब्रह्मचर्यंप्रजापतौतेनेदंप्रख्यापितमात्मविद्यागौरवंतावेवंतपस्विनौशु
द्धकल्मषौयोग्यावुपलक्ष्यप्रजापतिरुवाच।यएषोक्षिणिपुरुषोनिवृत्तचक्षुर्भिर्मृ
दितकषायैर्दृश्यतेयोगिभिर्हैषआत्मापहतपाप्मादिगुणोयमवोचंपुरोहंयद्विज्ञा
नात्सर्वलोककामावाप्तिरेतदमृतंत्वमाख्यंअतएवाभयमतएवब्रह्मबृहत्तममित्य
थैतत्प्रजापतिनोक्तमक्षिणिपुरुषोदृश्यतइतिवचःश्रुत्वाछायारूपंपुरुषंजगृहतुः॥
गृहीत्वाचदृढीकरणायप्रजापतिंपृष्ठवंतौ।अथयोयंभगवोप्सुपरिख्यायतेपरिसम
तात्।ज्ञायतेपश्चायमादर्शेआत्मनःप्रतिबिंबाकारःपरिख्यायतेयज्ञादौचकतमए
षएषांनवक्षिरुक्तःकिंवैकएवसर्वेष्वित्येवंपृष्टःप्रजापतिरुवाच।एषउएवयश्चक्षुषि
मध्येपुरुषोदृष्टोमयोक्तइत्येतन्मनसिकृत्वैषुसर्वेष्वंतेषुपरिख्यायतइतिहोवाच।नतुक

थंयत्तदुक्तंशिष्ययोर्विपरीतग्रहणमनुज्ञातंप्रजापतेर्विगतदोषस्याचार्यस्यसतोनानु
ज्ञानंकथंआत्मन्यध्यारोपितपांडित्यमहत्वबुद्धीइंद्रविरोचनौतथैवचप्रथितौलो
केतोयदिप्रजापतिनामूढौयुवांविपरीतग्राहिणावित्युक्तौस्यातांततस्तयोश्चित्तदुःखं
स्यात्।तज्जनिताच्चचित्तावसादात्पुनःप्रश्नश्रवणग्रहणावधारणंप्रत्युत्साहविघातःस्या
दतोरक्षणीयौशिष्याविति मन्यतेप्रजापतिःशृण्वीतांतावत्तुदशरावदृष्टांतेनापने
ष्यामीति।ननुनयुक्तमेषएवेतिअनृतंवक्तुं।नचानृतमुक्तंकथमात्मनोक्षिपुरु
षोमनसिसंनिहितःनरःशिष्यगृहीतछायात्मनःसर्वेषांचाभ्यंतरःसर्वांतरइतिश्रुतेस्त
मेवावोचदेषउएवेत्यतोनानृतमुक्तंप्रजापतिना।तथाचतयोर्विपरीतग्रहणनिवृ
त्त्यर्थंचाह॥७॥७॥उदशरावेउदकपूर्णेशरावादौआत्मानमवेक्षेथांयत्तत्रात्मनःपश्यं
तोनविजानीथस्तन्मेममप्रब्रूतमाचक्षीयाथामित्युक्तौतौहतथैवोदशरावेवेक्षांचक्रा
तेअवेक्षणंचक्रतुःतथाकृतवंतौहप्रजापतिरुवाचकिंपश्यथइति।ननुतन्मेप्रब्रूतमि
त्युक्तायांउदशरावेवेक्षणंकृत्वाप्रजापतयेननिवेदितमिदमावाभ्यांनविदितमित्य

निवेदितेचाज्ञानइतौप्रजापतिरुवाचकिंपश्यथइति।तत्रकोभिप्रायइत्युच्यते।नैव
तयोरिदमावयोरविदितमित्याशंकाभूत्।छायात्मन्यात्मप्रत्ययोनिश्चितएवासीत्तथै
नवक्ष्यतितौहशांतहृदयौप्रवव्रजतुरिति।नह्यनिश्चितेभिप्रेतार्थेप्रशांतहृदयत्वमुप
पद्यते।तेननोचतुरिदमावाभ्याम विदितमितिविपरीतग्राहिणौचशिष्यावत्तप्रेक्षणा
याविति स्वयमेवपप्रच्छकिंपश्यथइति।विपरीतनिश्चयापनयायचवक्ष्यतिसाध्वलंकृ
तावित्येवमादिना।तौहोचतुःयथैवावांभगवोलोमनखादिमंतौस्वएवमेवेदंलोमन
खादिसहितमावयोःप्रतिरूपमुदशरावेपश्यावइति।तौहपुनःप्रजापतिरुवाचछा
यात्मनिश्चयापनयायसाध्वलंकृतौयथास्वगृहेसुवसनौमहार्हवस्त्रपरिधानोपरि
ष्कृतौछिन्नलोमनखौचभूत्वोदशरावेपुनरीक्षेयाथामितीहवचनादिदेशपदज्ञातंत
न्मेप्रब्रूतमितिकथंपुनरनेनसाध्वलंकारादिकृत्वोदशरावावेक्षणेनतयोःछायात्म
प्रत्ययोपनीतःस्यात्।साध्वलंकारनरसुवसनादीनामागंतुनांछायाकरत्वमुदशरावेय
थाशरीरसंबद्धानामेवशरीरस्यापिछायाकरत्वंस्वर्वबत्तूवेतिगम्यते॥शरीरैकदेशानां

लोमनखादीनांनित्यत्वेनाभिनाभिप्रेतानामखंडितानांछायाकरत्वंसर्वमासात्॥छि
न्नेषुचनैवलोमनखछायादृश्यते॥लोमनखादिवच्छरीरस्याप्यागमापायित्वंसिद्धमित्यु
दशरावादौदृश्यमानस्यतन्निमित्तस्यचदेहस्यानात्मत्वंसिद्धमुदशरावादौछायाकरत्वा
देहसंबंधालंकारादिवत्एतेनयावत्किंचिदात्मीयत्वाभिमतंसुखदुःखरागद्वेषमोहा
दिकादाचित्कत्वान्नखरोमादिवदनात्मेतिप्रत्येतव्यं।एवमशेषमिथ्यात्वज्ञापनयानिमि
त्तेसाध्वलंकारादिदृष्टांतेप्रजापतिनोक्तेश्रुत्वातथास्तनवंतौरपिछायात्मविपरीतग्रहो
नापजगामयस्मात्तस्मात्स्वदोषेणैवकेनचित्प्रतिबद्धविवेकविज्ञानाविंद्रविरोचनावप्र
ताविति गम्यते॥तौसर्वविदेवहृष्टनिश्चयोपप्रच्छकिंपश्यथइति।तौतथैवप्रतिपन्नोयथै
वेदमितिसर्वविद्यथासाध्वलंकारादिविशिष्टौवावांस्वएवमेवेमौछायात्मानाविति।सुत
रांविपरीतनिश्चयौबभूवतुःयस्यात्मनोलक्षणंयआत्मापहतपाप्मे।त्युक्तापुनस्तद्वि
शेषमन्विष्यमाणयोर्यएषोक्षिणिपुरुषोदृश्यतइतिसाक्षादात्मनिनिर्दिष्टेतद्विपरीत
यज्ञापनयायोदशरावसाध्वलंकारदृष्टांतेप्यभिहितआत्मस्वरूपबोधाद्विपरीतग्रहो

नापगतोऽतःस्वदोषेणकेनचित्प्रतिबद्धविवेकविज्ञानसामर्थ्याविति मत्वायथाभिप्रेतमे
वात्मानमेषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतिप्रजापतिःसर्वविन्नतुवदेतेभिप्रेत
मात्मानंयआत्मेत्यात्मलक्षणश्रवणेनाक्षिपुरुषस्तुत्याचोदशरावाद्युपपत्त्याचसंस्कृतौ
तावन्मद्वचनंसंबंधुनःस्मरतोःप्रतिबंधक्षयाच्चस्वयमेवात्मविषयेविवेकोभविष्य
तीतिमत्वानःपुनर्ब्रह्मचर्यादिशोचतयोश्चित्तदुःखोत्पत्तिंपरिजिहीर्षंनिश्चितार्थबुद्धिन
यागच्छंतावप्युपेक्षितवान्प्रजापतिः।तौइंद्रविरोचनौशांतहृदयौहृदयौकृतार्थबुद्धी
इत्यर्थः॥नतुशमएव॥शमश्चैतयोर्ज्ञातोविपरीतग्रहोविगतोभविष्यत्॥राज्ञोर्न्नोगास
कयोर्यथोक्तविस्मरणंस्यादित्याशंक्याप्रत्यक्षंप्रत्यक्षवचनेचचित्तदुःखंपरिजिही
र्षुस्तौदूरंगच्छंतावन्वीक्ष्ययआत्मापहतपाप्मेत्यादिवचनवदेतदप्यनयोःश्रवणगोच
रत्वमेष्यतीतिमत्वोवाचप्रजापतिःअनुपलभ्ययथोक्तलक्षणमात्मानमननुविद्य
स्वात्मप्रत्यक्षंचास्तत्वाविपरीतनिश्चयोचयूर्नवेंद्रविरोचनावेतौप्रजातोगच्छेयातां।अ
तोपतरेदेवावासुरावाकिंविशेषितेनैतदुपनिषदंआम्नायायःग्रहीतात्मविद्यासेयस्तु

पनिषद्धेवंदेवानामसुराणांवातेएतदुपनिषदएवंविज्ञानाएतन्निश्चयान्नविष्यं
तीत्यर्थः॥तेकिंपराभविष्यंतिश्रेयोमार्गात्पराभूताबहिर्भूताविनिष्टाभविष्यंतीत्य
र्थः॥स्वयं इंगच्छतोःसुरासुरराजयोःऽसुरराजःसहशांतहृदयएवएवसविरोचनोऽसुरा
न्जगाम॥गत्वाचतेभ्योऽसुरेभ्यःशरीरात्मबुद्धिर्योपनिषत्तामेतामुपनिषदंप्रोवाचोक्तवा
न्॥देहमात्रमेवात्मापित्रोक्तइतितस्मादात्मैवंदेहइहलोकेमहय्यःपूजनीयः॥तथा
चपरिचर्यःपरिचरणीयः॥तथादात्मानमेवेहलोकेदेहंमहयन्परिचरंश्चोभौलोका
ववाप्नोतिमंचामुंचेहलोकपरलोकयोरेवसर्वेलोकाः॥कामाश्चांतर्भवंतीतिराभि
प्रायः॥तस्मादद्यसंप्रदायोद्याप्यनुवर्ततइतीहलोकेऽददानमविभागशीलमश्र
द्दधानंसत्कार्येषुश्रद्धारहितंयथाशक्तिअयजमानमयजनस्वभावमाहुरासुरःस्वा
सुरखल्वयंयतएवंस्वभावोभवतेविपरिद्यमानाआहुःशिष्टाः॥असुराणांहियस्मादश्रद्धा
नतादिलक्षणैषोपनिषत्तयोपनिषदासंस्कृताःसंतःप्रेतस्यशरीरंकुणपंभिक्षयागंधमा
ल्यान्नादिलक्षणयावसनेनवस्त्रादिनाछादनादिप्रकारेणालंकारादिकरणेनध्वजप

ताकादिकरणेनेत्येवंसंस्कुर्वंत्यनेनकुणपसंस्कारेणामुंप्रेत्यप्रतिपत्तव्यंलोकंजेष्यंतो
मन्यंते॥८॥५॥अथहकिलेंद्रोऽप्राप्यैवदेवान्दैव्याऽकोऽयादिसंपदायुक्तत्वाद्गुरोर्वचनंपु
नःपुनःस्मरन्नेवगच्छन्नेववक्ष्यमाणंनपश्वात्मग्रहणनिमित्तंददर्शदृष्टवान्॥उदशरा
वदृष्टांतेनप्रजापतिनायदर्थोऽन्यायउक्तःतदेकदेशोमघवतःप्रत्यनाबुद्धौयेनछायात्मा
ग्रहणेदोषंददर्श॥कथं॥यथैवखल्वयमस्मिंछरीरेसाध्वलंकृतेछायात्मापिसाध्वलंकृतो
भवतिसुवसनेसुवसनःपरिष्कृतेपरिष्कृतोयथानखलोमादिदेहावयवापगमेछा
यात्मापिपरिष्कृतोभवतिनखलोमादिरहितोभवति।एवमेवायंछायात्माप्यस्मिंछरी
रेनखलोमादिनिर्हृतावयवत्वस्यतुल्यत्वादंधेचक्षुषोपगमेऽंधोभवतिस्रामेस्रामः॥
किलैकनेत्रःतस्यअंधत्वेनगतत्वात्चक्षुनासिकाचयस्यसदास्रवतिसस्रामःपरिवृक्ण
छिन्नहस्तश्छिन्नपादोवास्रामेपरिवृक्णेवादेहेछायात्मापितथाभवति॥तथास्यदेहस्य
नाशमन्वेषनश्यतिअतोनाहमत्रास्मिन्छायात्मदर्शनेदेहात्मदर्शनेवाभोग्यंफलंप
श्यामीत्येवंदोषंदेहछायात्मदर्शनेध्रुवस्यसमित्पाणिःब्रह्मचर्यंवस्तुंपुनरेयायतं

इप्रजापतिरुवाचमघवन्यच्छांतहृदयःप्राव्राजीःप्रगतवानसिविरोचनेनसार्द्धंमिमिछं
न्पुनरागमइतिविज्ञानन्नपिपुनःपप्रच्छइंद्राभिप्रायोभिव्यक्तयेयदेच्छतेनमोपसादे
तियद्वत्तथाचस्वाभिप्रायंप्रकटमकरोत्यथैवखल्वयमित्याद्येवमेवेतिचानुमोद
त्प्रजापतिः।।ननुतुल्येद्विपुरुषश्रवणेदेहछायामीक्षेयइद्यात्मेतिदेहमेवतुविरोच
नःतत्किंनिमित्तं।तत्रमन्यंतेयथेंद्रस्योदशरावादिप्रजापतिवचनंस्मरतोदेवानप्राप्
स्येवाचार्येचायेक्तिबुध्याछायात्मग्रहणंतत्रदोषदर्शनंबहुत्वदर्शनंचाभूत्।नतथा
विरोचनस्यादेहएवात्मदर्शिनोनापितत्रदोषदर्शनंबहुत्वात्तद्देवविद्याग्रहणसामर्थ्य
प्रतिबंधदोषाल्पत्वबहुत्वापेक्षमिंद्रविरोचनयोःछायात्मदेहयोर्ग्रहणं।इंद्रोल्पदो
षत्वाहश्यतइतिश्रुत्यर्थमेवश्रद्धाननयाजग्राहेतरःछायानिमित्तंदेहंश्रुत्वाश्रुत्य
र्थलिंद्रणयाजग्राहप्रजापतिनोक्तोयमितिदोषत्रयस्त्वात्।यथाकिलनीलानीलयो
रादर्शेदृश्यमानयोर्वाससोर्यन्नीलंतन्ममइदमितिछायानिमित्तंवासएवोच्यते।नछा
यातद्ददितिविरोचनाभिप्रायःस्वचित्तग्रहणदोषवशादेवइशशाध्याविधारणं।तुल्येपि

श्रवणेख्यापितं।दाम्यतदत्तदयध्वमितिदकारमात्रश्रवणाच्छ्रुत्यंतरे।।निमित्तान्यपितद
नुगुणान्येवसहकारीणिभवंति।प्रकृतोयोमयोक्तआत्माएवमेवैषमघवसम्यक्तया
वगंतव्यः।नछायात्मेत्युवाचप्रजापतिःएतमेवात्मानंतुतेभूयःइत्यव्याख्यातमपिश्र
नुव्याख्यास्यामि।यस्मात्स्वछायाख्यातंदोषरहितानामवधारणविषयप्राप्तमपिना
ग्रहीरतःकेनचिद्दोषेणाप्रतिबद्धग्रहणसामर्थ्यस्त्वमतस्तत्क्षपणायंवसापराणिद्वा
त्रिंशतंवर्षाणीत्युक्त्वानयोषितवतेक्षपितदोषायतस्मैहोवाच।।१।।यआत्मापहत
पाप्मादिलक्षणोयएषोक्षिणीत्यादिनाव्याख्यातएषसकोसौयःस्वप्नेमहीयमानःश्रा
दिभिःपूज्यमानश्चरत्यनेकविधान्स्वप्नभोगाननुभवतीत्यर्थः।एषआत्मेतिहोवाचे
त्यादिसमानं।।सहैवमुक्तइंद्रःशांतहृदयःप्रवव्राज।सहाप्राप्यैवदेवानेवंविदस्मि
न्नप्यात्मनिभयंददर्शकथं।।तदिदंशरीरंयद्यप्यंधंभवति।स्वप्नात्मायोनंधःसभवति।।
यदिस्राममिदंशरीरंअस्रामःसभवति।।नैवैषस्वप्नात्मास्यदेहस्यदोषेणदुष्यति।।
नाप्यस्यवधेनसहन्यतेछायात्मवन्नचास्यस्रामेणस्रामःस्वप्नात्माभवतियद्यपि

दावागममात्रेणोपन्यस्तं नास्य जरयैतज्जीर्यतीत्यादि॥ नहि न्यायेनोपपादयितुमुप
न्यस्तं न तावदयं छायात्मवद्देहदोषयुक्तः॥ किंतु॥ भ्रांतित्वेवैनं एव शब्दः इवार्थे भ्रांतिवे
नं केचनेति द्रष्टव्यं। ननु भ्रांत्यैवेत्युत्तरेभुसर्वेषु विदद्दर्शनादस्य वधेन न हन्यत इति
विशेषणात्॥ भ्रांतित्वेवेति चोक्ते वं प्रजापतिप्रमाणं कुर्वतोऽनृतवादित्वापादनानुप
पत्तेरेतदमृतमित्येतत्प्रजापतिवचनं कथं मृषा कुर्यादिदं त्वं प्रमाणं कुर्वन्॥ ननु
छायापुरुषे प्रजापतिनोक्तेस्य शरीरस्य नाशमन्वेष नश्यतीति दोषमदधानत्येऽपि
स्यान्नैवं कस्माद्य एषोऽक्षिणि पुरुषो दृश्यत इति न छायात्मा प्रजापतिनोक्त इति मन्य
त मघवान्॥ कथं॥ अपहतपाप्मादिलक्षणोद्दिष्टेयदिच्छायात्मा प्रजापतिनोक्त इति म
न्यते। तदा कथं प्रजापतिं प्रमाणीकृत्य पुनः श्रवणाय समित्पाणिर्गच्छेत्॥ जगाम च। त
स्मान्न छायात्मा प्रजापतिनोक्त इति मन्यंते। तथा च व्याख्यातं य एषोऽक्षिणि दृश्यत इति
तथा विच्छादयंतीव विद्रावयंतीव। तथा च पुत्रादिमरणनिमित्तमप्रियवेत्तेव न वेत्ति।
अपि च स्वयमपि रोदितीव ननु अप्रियं वेत्त्येव कथं वेत्तेव वेत्तीत्युच्यते। न। अमृताभयत्वव

चनानुपपत्तेः॥ ध्यायतीव इति श्रुत्यंतरात्॥ ननु प्रत्यक्षविरोध इति चेत्। न। शरीरात्मत्व
प्रत्यक्षवद्भ्रांतिसंभवात्। निष्ठुनावदप्रियवेत्तेव न वेत्ति। नाहमत्र भोग्यं पश्यामित्य
आत्मज्ञानेऽपीष्टं फलं नोपलभ इत्यभिप्रायः प्रायः एवमेवैष तवाभिप्रायेणेति वाक्य
शेषः॥ आत्मनोऽमृताभयगुणवत्त्वस्याभिप्रेतत्वात्॥ द्विरुक्तिमपि न्यायतो यथावन्ना
वधारयतीति तस्माद्यापि प्रतिबंधकारणमस्तीति मन्वानस्तत्क्षपणाय वसापराणि द्वा
त्रिंशतं वर्षाणि ब्रह्मचर्यमित्यादिदेश प्रजापतिः तथोषितवते क्षपितकल्मषाया
ह॥ ८॥ १०॥ सर्वविदेतं त्वेव त इत्याद्युक्त्वा तद्यत्रैतत्सुप्त इत्यादि व्याख्यातं वाक्यमक्षिणि
यो दृष्टः स्वप्ने च महीयमानश्चरति स एषः सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति
य आत्मेति निर्दिष्टो वा चैतदमृतमभयमेतद्ब्रह्मेति स्वाभिप्रेतमेवमघवान्तत्रापि दोषं द
दर्श। कथं। नाह। नैव। सुषुप्तस्थोऽप्यात्मा खल्वयं संप्रति सम्यगिदानीं चात्मानं जाना
ति नैवं जानाति। कथं। अयमहमस्मीति। नो एवेमानि भूतानि चेति यथा जाग्रति स्वप्ने
वातो विनाशमिवेति सर्ववद्द्रष्टव्यं। अपीतोऽपिगतो भवति विनष्ट इव भवतीत्यभिप्रा

योज्ञानेद्दृसतिज्ञातुःसद्भावोगम्यते।नासतिज्ञानेनचक्षुष्मस्यज्ञानंदृश्यतेतोवि
नष्टइवेत्यभिप्रायोनष्टमेवविनाशमेवात्मनोमन्यतेश्रुतान्यवचनस्यप्रामाण्याभि
छन्।एवमिदेवमेवेत्युक्त्वायोमयोक्तस्त्रिभिःपर्यायैस्तमेवैतंनोएवान्यत्रैतस्मादा
त्मनोन्यत्किंचनकिंतर्हिएतमेवव्याख्यास्यामीत्यल्पस्तुदोषस्तवावशिष्टस्तत्क्षपणा
यवसापराण्यन्यानिपंचवर्षाणीत्युक्तःसतथाचकार॥तस्मैक्षपितकषायादिदोषाय
स्थानत्रयदोषसंबंधरहितमात्मनःस्वरूपमपहतपाप्मादिलक्षणंमघवतेतस्मैहो
वाचतान्येकशतंवर्षाणिसंपेदुःसंपन्नानिबभूवुःयदाहुर्लोकेशिष्टाएकशतंहवै
वर्षाणिमघवान्प्रजापतौब्रह्मचर्यमुवासेतितदेतद्द्वात्रिंशतमित्यादिनादर्शितमि
त्याख्यायिकातोपस्त्यस्तुत्योच्यते।एवंकिलैतदिंद्रत्वादपिगुरुतरमिंद्रेणापिमह
तायत्नेनैकोत्तरवर्षशतकृतेनायासेनप्राप्तमात्मज्ञानमतोनातःपरंपुरुषार्थोनिरम
स्तीत्यात्मज्ञानंस्तौति॥३॥१॥मघवन्मर्त्यंवैमरणधर्मश्रेदंशरीरंयन्मन्यसेक्ष्याधारादि
लक्षणःसंप्रसादलक्षणःआत्मामयोक्तोविनाशमेवापीतोभवतीति।शृणुतत्रकार

णंयदिदंशरीरंवैयत्पश्यसितदेतन्मर्त्यंविनाशितद्यात्तंमृत्युनाग्रस्तंसततमेव।कदाचि
द्विघ्रियतइतिमर्त्यमित्युक्ते।नतथासंत्रासोभवतियथाग्रस्तमेवसदाव्याप्तमेवमृत्यु
नेत्युक्तेइतिवैराग्यार्थंविशेषइत्युच्यते।आत्तंमृत्युनेतिकथंनामदेहाभिमानतोवि
रक्तःसन्निवर्त्ततइति।शरीरमप्यत्रसहेंद्रियमनोभिरुच्यते।तच्छरीरमस्यसंप्रसादस्य
त्रिस्थानतयागम्यमानस्यामृतस्यमरणादिदेहेंद्रियमनोधर्मवर्जितस्येत्येतदमृत
स्येत्यनेनैवाशरीरत्वेसिद्धेपुनरशरीरस्येतिवचनंवाय्वादिवत्सावयवत्वमनित्यत्वे
माभूतामित्यात्मतआत्मनोभोगाधिष्ठानमात्मनोवासतइदंहिसत्तेजोबन्नादिकर्म
णाव्यन्नमधिष्ठानंजीवरूपेणप्रविश्यसदेवाधितिष्ठत्यस्मिन्नितिवाधिष्ठानं॥यस्येद
मीदृशंनित्यमेवमृत्युग्रस्तंधर्माधर्मजनितत्वात्प्रियाप्रियवदधिष्ठानंतदधिष्ठितस्तथा
सशरीरोभवति।अशरीरस्वभावस्यात्मनस्यदेवाहंशरीरंशरीरमेवचाहमित्यविवेका
त्मभावःसशरीरत्वंसशरीरःसन्नाग्रस्तःप्रियाप्रियाभ्यांप्रसिद्धमेतत्तस्यवचनंवैस
शरीरस्यसतःप्रियाप्रिययोर्बाह्यविषयसंयोगवियोगौममेतिमन्यमानस्यापहतिर्वि

नाशउच्छेदः संततिरूपयोर्भ्रान्तिनिर्देहाभिमानादशरीरस्वरूपविज्ञानेननिवर्त्तितावि
वेकज्ञानमशरीरंसंतंप्रियाप्रियेनस्पृशतः स्पृशिः प्रत्येकंसंबध्यत इति प्रियंनस्पृशत्य
प्रियंनस्पृशतीतिवाक्यद्वयंभवतिनम्लेच्छाशुच्यधार्मिकैःसहसंभाषेतेतियद्वत्।धर्माधर्म
कार्येहितेअशरीरतातुस्वरूपमिति॥तत्रधर्माधर्मयोरसंभवात्तत्कार्याभावोइत
एवेत्यतोनप्रियाप्रियेस्पृशतोननुयदिप्रियमप्यशरीरंनस्पृशतीतियन्मघवतोक्तंसु
षुप्तस्थोविनाशमेवापीतोभवतीतितद्देवेऽप्यापन्नंनैषदोषोधर्माधर्मकार्ययोःश
रीरसंबंधिनोःप्रियाप्रिययोःप्रतिषेधस्यविवक्षितत्वादशरीरंनप्रियाप्रियेस्पृशतइ
त्यादिश्रुत्याआगमापायिनोर्हिस्पर्शशब्दोदृष्टोयथाशीतस्पर्शउष्णस्पर्शइतिनत्वग्ने
रुष्णप्रकाशयोःस्वभावभूतयोरग्निनास्पर्शइतिभवति।तथाग्नेःसवितुर्वोष्णप्रकाशव
स्वरूपभूतस्यानंदस्यप्रियस्यापिनेहप्रतिषेधोविज्ञानमानंदंब्रह्मेत्यादिश्रुतिभ्यः॥
इहापिभूमैवसुखमित्युक्तत्वात्॥ननुभूम्नःप्रियस्यैकत्वेसंवेद्यत्वात्स्वरूपेणैवनानि
त्यसंवेद्यत्वान्निर्विशेषतेति।नेन्द्रस्यतदिष्टं।नाहखल्वयंसंप्रत्यात्मानंजानात्ययमह

मस्मीतिनोएवेमानिभूतानिविनाशमेवापीतोभवति।नाहमत्रभोग्यंपश्यामीत्युक्तत्वा
त्॥नदिंद्रस्येष्टंयद्भूतानिचात्मानंचनजानाति॥नचाप्रियंकिंचिद्वेत्ति।ससर्वांश्चलोकाना
प्नोतिसर्वांश्चकामान्येनज्ञातेन॥सत्यमेतदिष्टमिंद्रस्यइमानिमत्तोन्यानिलोकाश्च
कामाश्चसर्वेमत्तोन्येइमेषांस्वामीतिनत्वेतदिंद्रस्याहितंहितंचेंद्रस्यप्रजापतिनावक्त
व्यंव्योमवदशरीरात्मतयासर्वभूतलोककामात्मनोपगमेनयात्मित्तद्धितमिंद्रायव
क्तव्यमितिप्रजापतेरभिप्रेतं॥ननुराज्ञोराज्यादिवदन्यत्वेवंन॥तत्रैवंकंकेनविजानी
यादात्मैकत्वेइमानिभूतान्ययमहमस्मीतिनत्वस्मिन्पक्षेत्वा।निवयोनेवसियदिपि
तृलोककामःसएकधाभवतीत्याद्यैश्वर्यश्रुतयोनुपपन्नाः॥न।सर्वात्मनःसर्वफल
संबंधोपपत्तेरविरोधात्॥मृदइवसर्वघटचरुकुंडाद्यात्मतः॥ननुसर्वात्मत्वेदुःखसंबं
धोपिस्यादितिचेत्॥न।दुःखस्याप्यात्मत्वोपगमादविरोधः॥आत्मन्यविद्याकल्पनानि
मित्तानिदुःखानिरज्ज्वामिवसर्पादिकल्पनानिमित्तानि।सात्वविद्याशरीरात्मैकत्व
स्वरूपदर्शनेनदुःखनिमित्तोच्छिन्नेतिदुःखसंबंधाशंकानसंभवति।शुद्धसत्त्वसंकल्प

निमित्तानांतुकामानामीश्वरदेहसंबंधः॥सर्वभूतेषुमानसानां।परएवसर्वसत्वो
पाधिकारेणोक्तेति।सर्वाविद्याकृतसंव्यवहाराणांपरएवात्मास्पदोनान्योस्तीतिवे
दांतसिद्धांतः॥यएषोक्षिणिपुरुषोदृश्यतइतिछायापुरुषएवप्रजापतिनोक्तः॥स्वप्नसु
षुप्तयोश्चान्यएवनपरोपहतपाप्मादिलक्षणंविरोधादितिकेचिन्मन्यंते।छायाद्यात्म
नांचोपदेशेप्रयोजनमाचक्षते।आदावेवोच्यमानेकिलदुर्विज्ञेयत्वात्परस्यात्मनोत्यं
तबाह्यविषयासक्तचेतसोत्यंतसूक्ष्मवस्तुश्रवणेव्यामोहोमाभूदिति॥यथाकिलद्विती
यायांसूक्ष्मंचंद्रंदिदर्शयिषुर्वृक्षंकंचिन्नत्यक्षमादौदर्शयति।पश्यामुमेषचंद्रइतित
तोन्यंततोप्यतिनिगिरिशिखरंनिंचचंद्रसमीपस्थमेषइतिततोसौचंद्रंपश्यतिएवमेतद्यए
षोक्षिणीत्याद्युक्तंप्रजापतिनात्रिभिःपर्यायैर्नपरइति।चतुर्थेतुपर्यायेदेहान्मस्याभिसु
छायाशरीरतामापन्नोज्योतिःस्वरूपंयस्मिन्नुत्तमपुरुषेस्त्यादिनिर्जिन्हाय॥कोऽउत्तम
मागोन्नवतिसउत्तमःपुरुषःपरउक्तइतिचाहुः॥सत्यं।रमणीयातावदियंव्याख्या।श्रो
तुंनत्वर्थोस्यग्रंथस्यैवंसंभवति॥कथं॥अक्षिणिपुरुषोदृश्यतइतित्युपन्यस्याशिष्याभ्यां

छायात्मनिगृहीतेतयोस्तद्विपरीतग्रहणंमत्वातदपनयायोदशरावोपन्यासःकिंपश्य
थइतिचप्रश्नः॥साध्वलंकारोपदेशश्चानर्थकःस्यात्यदिछायात्मैवप्रजापतिनाक्षिणिदृ
श्यतइत्युपदिष्टः॥किंच॥यदिस्वयमुपदिष्टःइतिग्रहणस्याप्यपनयकारणंवक्तव्यंस्यात्स्व
प्नसुषुप्तात्मग्रहणयोरपितदपनयकारणंब्रूयान्नचोक्तंतेनमन्यामहेनाक्षिणिछाया
त्माप्रजापतिनोपदिष्टःकिंचान्यत्अक्षिणिद्रष्टाचेद्दृश्यतइत्युपदिष्टःस्यात्ततइदंयुक्त
मेतंत्वेवंतइत्युक्त्वास्वप्नेपिद्रष्टुरेवोपदेशः।स्वप्नेनद्रष्टोपादिष्टइतिचेत्।नापिरोदितीवा
प्रियवेत्तेवेत्युपदेशान्नचद्रष्टुरन्यःकश्चित्स्वप्नेमहीयमानश्चरति॥अत्रायंपुरुषःस्वयंज्यो
तिरितिन्यायतःश्रुत्यंतरेसिद्धत्वाद्यद्यपिस्वप्नेसधीर्भवति॥तथापिनधीःस्वप्नभोगोपल
ब्धिप्रतिकरणत्वंभजतेकिंतर्हिपटचित्रवज्जाग्रद्वासनाश्रयाद्रष्टुरेवधीर्भवतीतिनद्र
ष्टुःस्वयंज्योतिष्ट्वबाधःस्यात्।किंचान्यत्जाग्रत्स्वप्नयोर्भूतानिचात्मानंचजानातीमानि
भूतानिअयमहमस्मीतिप्रासौसत्यंप्रतिषेधोयुक्तःस्यान्नाहखल्वयमित्यादितथाचेत
नस्यैवाविद्यानिमित्तयोःसशरीरत्वेसतिप्रियाप्रिययोरपहतिर्नास्तीत्युक्त्वातस्यैवाशरी

रस्यसतोऽविद्यायांसत्यांसशरीरत्वेप्राप्तयोःप्रतिषेधोयुक्तोऽशरीरंवावसंतंनप्रियाप्रि
येनस्पृशतएकश्चात्मास्वप्नबुद्धांतयोर्महामत्स्यवदसंगःसंचरतीतिश्रुत्यंतरेसिद्धं॥य
च्चोक्तंसंप्रसादश्शरीरात्समुत्थाययस्मिन्स्त्र्यादिभीरममाणोभवतिसोन्यःसंप्रसादाद
धिकरणनिर्दिष्टःउत्तमपुरुषइति॥तदप्यसच्चतुर्थेपिपर्यायेएतंत्वेवतइतिवचनाद्वि
तनोन्योनिर्दिष्टःस्यात्सर्वविदेतंत्वेवतइतिनब्रूयान्मृषाप्रजापतिः॥किंचान्यत्तेजोबन्नादीनां
त्र्युःसतःस्वविकारदेहशुंगप्रवेशंदर्शयित्वाप्रविश्यपुनस्तत्त्वमसीत्युपदेशोमृषा
प्रसज्येत॥तस्मिंस्त्वंस्त्र्यादिभीरंताभविष्यसीतियुक्तउपदेशोभविष्यद्यदिसंप्रसादा
दन्यउत्तमः॥पुरुषोभवेत्तथाचब्रह्मैवेत्यादिश्यात्मैवेदंसर्वमितिनोपसमहरिष्यत्
यदितस्माज्जीवादन्योभविष्यन्नान्यदतोस्तिद्रष्टेत्यादिश्रुत्यंतराच्च॥सर्वश्रुतिषुचपरस्मि
न्नात्मशब्दप्रयोगोनाभविष्यत्प्रत्यगात्माचेत्सर्वजंतूनांपरआत्मानभवेत्तस्मादेकएवा
त्माप्रकरणीसिद्धःनैवात्मनःसंसारित्वमविद्याध्यस्तत्वादात्मनिसंसारस्य॥नहिर
ज्जुशुक्तिकागगनादिषुसर्परजतमलादीनिमिथ्याज्ञानाध्यस्तानितेषांभवंतीत्येतेनस

शरीरस्यप्रियाप्रिययोरपहतिर्नास्तीतिव्याख्यातं॥यत्तुस्थितमप्रियवेत्तेवेतिनाप्रियवेत्तै
वेतिसिद्धमेवंचसतिसर्वपर्यायेष्वेतदमृतमभयमेतद्ब्रह्मेतिप्रजापतेर्वचनंयदिवा
प्रजापतिच्छद्मरूपायाःश्रुतेर्वचनंसत्यमेवभवेन्नचतत्कुतर्कबुध्यामृषाकर्तुंयुक्तं॥
ततोगुरुतरस्यप्रमाणांतरस्याप्युपपन्नेर्ननुप्रत्यक्षंदुःखाद्यप्रियवेत्तृत्वमव्यभिचार्य
नुभूयतइतिचेत्॥नजरादिनहितेजाणोहंज्ञानोहमायुष्मान्गौरःकृष्णोमृतइतिप्रत्या
दिप्रत्यक्षानुभववत्तदुपपत्तेः॥सर्वमप्येतत्सत्यमितिचेदस्यैवैतदेवंदुरवगमंयेनदे
वराजोप्युदशरावादिदर्शिताविनाशयुक्तिरपिसुमोहैवात्रविनाशमेवापीतोभवतीति
तथाविरोचनोमहाप्राज्ञःप्राजापत्योपिदेहमात्रात्मदर्शनोबभूव॥तथेदंस्यात्मविनाश
नयसागरएववैनाशिकाःन्यमज्जंस्तथासांख्यादयोद्रष्टारंदेहाद्व्यतिरिक्तमवगम्यापित्य
क्तागमप्रमाणत्वान्मृत्युविषयएवान्यत्वदर्शिनस्तुःततोन्येकाणादादिदर्शनाःकषा
यरक्तमिववस्त्रंक्षारादिभिर्वस्त्रंनवनिरात्मगुणेयुक्तमात्मद्रव्यंविशोधयितुंप्रवृत्तास्तथाक
र्मिणोबाह्यविषयापहृतचेतसोवेदप्रमाणाअपिपरमार्थसत्यमात्मैकत्वंविनाशमि

वेदवन्मन्यमानाघटीयंत्रवदारोहावरोहप्रकारैरनिशंबंभ्रमंति।किमन्येतुप्रजंतवो
विवेकहीनाःस्वभावतएवबहिर्विषयापहृतचेतसः।तस्मादिदंत्यक्तसर्वबाह्यैषणैर
नन्यशरणैःपरमहंसपरिव्राजकैरत्याश्रमिभिर्वेदांतविज्ञानपरैरेववेदनीयंस्तुत
मेःप्राजापत्यंचेमंसंप्रदायमनुसरद्भिरुपनिबद्धंप्रकरणचतुष्टयेनतथानुशासमसत्य
ग्रापितएवनान्यइति।तत्राशरीरस्यसंप्रसादस्याविद्ययाशरीरेणविशेषतांसशरीरता
मेवसंप्राप्तस्यशरीरात्समुत्थायस्वेनरूपेणयथानिष्पत्तिस्तथावक्तव्येतिहदृष्टांतउच्यते
शरीरोवायुरविद्यमानंशिरःपाण्यादिमच्छरीरमस्येत्यशरीरः।किंचाभ्रंविद्युत्स्तनयित्नु
रित्येतानिचाशरीराणितत्रैवंसतिवर्षादिप्रयोजनावसानेयथामुष्मादितिनिर्दिष्टा
श्रुतिर्द्युलोकसंबंधिनमाकाशदेशंव्यपदिशति।एतानियथोक्तान्याकाशसमानरूप
तामापन्नादीनिस्वेनवाय्वादिरूपेणादृश्यमानानिआकाशाख्यतांगतानि।यथासंप्र
सादो।विद्यावस्थायांशरीरात्मभावमेवापन्नः।तानिचतथाभूतान्यमुष्माद्द्युलोकसंबं
धिनआकाशदेशात्समुत्तिष्ठंतिवर्षणादिप्रयोजनानिष्पत्तये।कथं।शिशिरापाये

सावित्रंपरंज्योतिःप्रत्यक्षंग्रैष्मिकंउपसंपद्यसावित्रमभितापंप्राप्येत्यर्थः।आदित्याभितापे
नघनभावमापादिताःसंतःस्वेनस्वेनरूपेणपुरोवातादिवायुरूपेणस्तिमितभावंहित्वाऽभ्र
मपिपर्वतहस्त्यादिरूपेणविद्युदपिस्वेनज्योतिर्लताचपलरूपेणस्तनयित्नुरपिस्वेनगर्जिता
शनिरूपेणेत्येवंप्रावृडागमेस्वेनस्वेनरूपेणाभिनिष्पद्यंते॥यथायंदृष्टांतोवाय्वादीनामा
काशादिसाम्यागमनवदविद्ययासंसारावस्थायांसशरीरसाम्यमापन्नोऽहममुष्यपुत्रो
जातोजीर्णोमरिष्यइतिएवंप्रकारंप्रजापतिनेवमघवान्ययोक्तेनक्रमेणानात्मत्वंदेहेंद्रि
यादिधर्मान्नधर्म्मांस्तत्त्वमसीतिप्रतिबोधितःसन्सएषसंप्रसादोजीवोऽस्माच्छरीरादाका
शादिववाय्वादयःसमुत्थायदेहादिविलक्षणंयमात्मनोरूपमवगम्यदेहात्मभावनांहि
त्वाइत्येतत्स्वेनरूपेणसदात्मनैवाभिनिष्पद्यतइतिव्याख्यातंपुरस्तात्।स्वेनस्वेनरूपेण
संप्रसादोनिष्पद्यतेप्राक्प्रतिबोधात्तज्ज्ञातिनिमित्तास्वप्नेपिनिवर्तितयास्मृतेः।पश्चात्कृत
प्रकाशात्स्वात्मनास्वेनरूपेणाभिनिष्पद्यते।अतएवसउत्तमपुरुषःउत्तमश्चासौपुरु
षश्चेत्युत्तमपुरुषःसएवोत्तमपुरुषोऽक्षिणिचपुरुषोव्यक्तःस्वप्नसुषुप्तःसमस्तःसं

प्रसन्नाऽशरीरश्च स्वेन रूपेण। स एष मयेस्वेन रूपेणावस्थितः। स्वराड्भोक्ताव्याख्यातावपे
क्षोत्तमपुरुषः स तन्निर्वचनोऽयं गीतासु। स संप्रसादः स्वेन रूपेण तत्र स्वात्मनि स्वस्थित
या सर्वात्मत्वतः पर्येति किं चिदिंद्राद्यात्मना उत्क्षद्धसन्। भक्षयन्वा भक्ष्यान् उच्चावचान्। स्त्रिभि
र्वा कैश्चिन्मनोमात्रेण संकल्पादेव समुत्थितैर्ब्रह्मलौकिकैर्वा कैरुक्षादिभिः रममाण
श्च मनसैव नोपजनं स्त्रीपुंसयोरन्योन्योपगमेन जायत इत्युपजनमात्मभावेन वात्मसा
मीप्येन जायत इत्युपजनमात्मभावेन वात्मसामीप्येन जायत इत्युपजनमिदं शरीरं तन्न
स्मरन्। तत्स्मरणेऽपि दुःखमेव स्यात्। दुःखात्मकत्वात्तस्य नन्वनुभूतं चेन्न स्मरेत् सर्वज्ञस्य मु
क्तस्य। नैष दोषो येन मिथ्याज्ञानादिना जनितं तत्। मिथ्याज्ञानादि वियोच्छेदितमत
स्तन्नानुभूतमेवेति न तत्स्मरणे सर्वज्ञत्वहानिः। न ह्युन्मत्तेन यदृष्टं तेन वा यदनुभूतं त
दुन्मादाद्यपगमेऽपि स्मर्तव्यं स्यात्। तथेहापि संसारिणि अविद्यादोषवशाद्यदनुभूतं येनेतस्य
वत्मानमशरीरं न स्पृशति। अविद्यानिमित्ताभावात्। ये तु छिन्नदोषैर्मृदितकषायैर्म
नसा सत्याः कामा अनृतापिधाना अनुभूयंते विद्याभिव्यंग्यत्वात्। त एव मुक्तेन सर्वात्म

त्वेन संबध्यंत इत्यात्मज्ञानस्तुतये निर्दिश्यंते। अतः साम्येतरहितिनाम्पि एते ब्रह्मलोक
इति यत्र कंचन नवंतोऽपि ब्रह्मण्येव हि ते लोकेन वंती ति स्ववात्मित्वाद् ब्रह्मण उच्यंते।
ननु कथमेकः सन्नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति भूम्नः कामांश्च ब्रह्मलौकि
कान्पश्यन्। मदिति विरुद्धं यथैको यस्मिन्नेव क्षणे पश्यति मनस्तस्मिन्नेव क्षणे न पश्य
ति चेति। नैष दोषः श्रुत्यंतरे परिहृतत्वात्। द्रष्टुर्दृष्टेरविपरिलोपात् पश्यन्नेव न वति द्रष्टु
रन्यत्वेन कामाना मननावान्न पश्यति चेति यद्यपि सुषुप्ते तदुक्तं मुक्तस्यापि स्वैकत्वास
मानादिति यावत्। केन कं पश्येदिति चोक्तमेव। अशरीरस्वरूपो मदतपाप्मादिलक्ष
णः स कथमेष पुरुषोऽक्षिणि दृश्यत इत्युक्तं प्रजापतिना। तत्र यथासौ वर्त्तते। साक्षाद्हृदय
ते न युक्तमिति दृष्टांतः तत्र कोऽस्यं चक्षुरक्षिणि दर्शनि इत्यादि। महदृष्टांतः प्रयोग्य परो वाम
शब्दः प्रयुज्यत इति प्रयोग्योऽश्वो बलीवर्दो वा यथा लोके आचरत्यनेनेत्याचरणो रथो नो वा
तस्मिन्नाचरणे युक्तः तदाचरणाय एवमस्मिंछरीरे रथस्थानीये प्राणः पंचवृत्तिरिंद्रियम
नोबुद्धिसंयुक्तः प्रज्ञात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्छितात्मा युक्तः स्वकर्मफलोपभोग

निमित्तंनियुक्तः।कास्मान्नइदमुत्क्रांतःउत्क्रांतोत्रविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्या
मीति।इश्वरेणराज्ञइवसर्वाधिकारीदर्शनश्रवणचेष्टाव्यापारेधिकृतस्यैववस्तुमात्रेकदेश
चक्षुरिंद्रियंरूपोपलब्धिद्वारंकृतं।अथयत्रतत्स्मसारोपलक्षितमाकाशंदेहछिद्रम
नुविषण्णंअनुषक्तमनुगतंतत्रसप्रज्ञतोशरीरआत्माचक्षुषिभवति।चाक्षुषःचक्षु
षिभवइतिचचक्षुषस्तस्यदर्शनायरूपोपलब्धयेचक्षुःकरणं।यस्यतदेहादिभिःसंहत
त्वात्परस्यरूपुरयंश्रोत्रचाक्षुषिदर्शनेनलिंगेनदृश्यते।परोशरीरोसंहतोदृणिदृश्यत
इतिप्रजापतिनोक्तंसर्वेंद्रियद्वारोपलब्ध्यर्थंसर्वविषयोपलब्धाहिसएवेति।स्फुटो
पलब्धिहेतुत्वात्स्वरूपिणितिविशेषवचनं।सर्वश्रुतिबइमदर्शमितितत्सत्यंभवतीतिच
श्रुतेरथापियोस्मिन्देहेवेदकथमिदंसुगंधिदुर्गंधिवाइतिघ्राणिइत्यस्यगंधंविजानीया
मिति।सआत्मातस्यगंधायगंधविज्ञानायघ्राणंकरणमभिव्याहरणातिवदिष्यामि
तिसआत्माभिव्याहरणक्रियासिद्ध्येकरणंवागिंद्रियं।अथयोवेदेदंश्रणवानितिस
आत्माश्रवणायश्रोत्रमथयोवेदेदंमन्वानीतिमननव्यापारमिंद्रियासंप्रयुक्तंकेवलं

मन्वानीतिवेदसआत्मायोवेदसआत्मेत्येवंसर्वत्रप्रयोगाद्वेदनमस्यस्वरूपमित्यवगम्यते
यथायःपुरस्तात्प्रकाशयतिसआदित्योयोदक्षिणतोयःपश्चाद्यउत्तरतोयऊर्ध्वंप्रकाशय
त्यादित्यइत्युक्तेप्रकाशःस्वरूपःसइतिगम्यते।दर्शनादिक्रियानिर्वर्त्यर्थानितुचक्षुरादिक
रणानीदंचास्यात्मनःसामर्थ्यादवगम्यते॥आत्मनःसत्तामात्रएवज्ञानकर्तृत्वंनतुव्यापृ
ततयातथाभवितुःसत्तामात्रमात्रएवज्ञानकर्तृत्वंनतुव्यापृततयेतितदृन्मनोस्यात्मनोदै
वमप्राप्तमितरेंद्रियैरसाधारणं॥चक्षुषेष्टेपश्यत्यनेनेतिवर्तमानकालविषयाणिचें
द्रियाण्यतोदैवानितानि॥मनस्तुत्रिकालविषयोपलब्धिकरणंस्मृतिदोषंचसूक्ष्मव्य
वहितादिसर्वोपलब्धिकरणंचेतिदैवंचक्षुरुच्यते॥सवैमुक्तःस्वरूपापन्नोविद्यातदे
हेंद्रियमनोवियुक्तःसर्वात्मभावमापन्नःसन्नेषव्योमवद्विशुद्धःसर्वेश्वरोमनउपाधिः
सन्नेतेनैवेश्वरेणमनसैतत्कामान्सविद्रप्रकाशवन्नित्यप्रततेनदर्शनेनपश्यन्नमतेका
मान्कामानितिविशिनष्टियएतेब्रह्मणःपरलोकेब्रह्मलोकेहिरण्यनिधिवदालविषयासं
गान्ततेनापिहिताःकेसैत्यमानस्व्यात्त्वादित्ययोयस्मादेवइंद्रायप्रजापतिनोक्तआत्मानं

स्मात्तंश्रुत्वातमात्मानमद्यत्वेपिदेवाउपासतेतदुपासनाच्चतेषांसर्वेचलोकाःआ
त्ताःप्राप्ताःसर्वेचकामाः।यदर्थंहींद्रएकशतंवर्षाणिप्रजापतौब्रह्मचर्यमुवासतत्फलं
प्राप्तंदेवैरित्यभिप्रायः।तद्युक्तंदेवानांमहाभाग्यात्।नत्विदानींमनुष्याणामल्पजीवि
तत्वान्मंदतरप्रज्ञत्वाच्च।संभवतीतिप्राप्तइदमुच्यते।ससर्वांश्चलोकानाप्नोतिसर्वां
श्चकामानिदानींतनोपिकोसाविंद्रादिवद्यस्तमात्मानमनुविद्यविजानातीतिहस्मा
मान्येनकिलप्रजापतिरुवाच॥अतःसर्वेषामात्मज्ञानंतत्फलप्राप्तिश्चतुल्यैवभव
नात्यर्थोद्विर्वचनंप्रकरणसमाप्त्यर्थं॥६॥१२॥श्यामाच्छबलंप्रपद्यइत्यादिमंत्राम्नायः
पावनोजपार्थश्चध्यानार्थोवाश्यामोगंभीरोवर्णःश्यामइवश्यामोहार्दंब्रह्मात्यंतदु
रवगाह्यत्वात्तद्धार्दंब्रह्मज्ञात्वाध्यानेनतस्माच्छ्यामाच्छबलंशबलइवशबलोरण्याद्य
नेककाममिश्रत्वात्ब्रह्मलोकस्यशाबल्यंतंब्रह्मलोकंशबलंप्रपद्येमनसाशरीर
पातादूर्ध्वंगच्छेयं।यस्माद्धशबलाद्ब्रह्मलोकान्नामरूपव्याकरणतयाश्यामंप्रपद्ये
हार्दंभावंप्रपन्नोस्मीत्यभिप्रायोतस्तमेवप्रकृतिस्वरूपमात्मानंशबलंप्रपद्यइत्यर्थः॥

कथंशबलंब्रह्मलोकंप्रपद्यइत्युच्यते।अश्वइवस्वानिलोमानिविधूयकंपनेनश्रमं
पांस्वादिचरोमभ्योपनीययथानिर्मलोभवतीत्येवंहार्दब्रह्मज्ञानेनविधूयपापंधर्मा
धर्माख्यं।चंद्रइवराहुग्रस्तस्तस्माद्राहोःप्रमुच्यभास्वरोभवति।यथैवंधूत्वाप्रहायश
रीरंसर्वानर्थाश्रयमिहैवध्यानेनकृतात्माकृतकृत्यःसन्नकृतंनित्यंब्रह्मलोकमभि
संभवामीतिद्विर्वचनंमंत्रसमाप्त्यर्थं॥१३॥आकाशोवैइत्यादिब्रह्मणोलक्षणनिर्देशा
र्थमाम्नायाआकाशोवैनामश्रुतिषुप्रसिद्धआत्माआकाशइवाशरीरत्वात्सूक्ष्मत्वाच्चस
चाकाशोनामनामरूपयोःस्वात्मस्थयोर्जगद्बीजयोःसलिलस्येवफेनस्थानीययो
निर्वहितानिर्वोढाव्याकर्त्तेतिनामरूपेयदंतरायस्यब्रह्मणोंतरामध्येवर्त्तेते।तयो
र्वानामरूपयोरंतरामध्येयन्नामरूपाभ्यामस्पृष्टंयदित्येतद्ब्रह्मनामरूपविलक्षणं
नामरूपाभ्यामस्पृष्टंतथापितयोर्निर्वोढृएवंलक्षणंब्रह्मेत्यर्थः।इदमित्थंकथंतदव
गम्यतइत्याह।सआत्माआत्माहिनामसर्वजंतूनांप्रत्यक्चेतनःस्वसंवेद्यप्रसिद्धः।तेन
स्वरूपेणाम्नायाशरीरोव्योमवत्सर्वगतआत्माब्रह्मेत्यवगंतव्यं।सआत्माब्रह्मामृ

तममरणधर्मत्तिजह्यं मंत्रः प्रजापतिश्चतुर्मुखस्तस्यसभांवेश्मप्रभुविमितंवेश्मप्रपद्ये
गच्छेयं॥किंच॥यशोहंयशोनामात्माहंभवामिब्राह्मणानांब्राह्मणाएवहिविशेषतस्तमु
पासतेतत्तेषांयशोभवतितथाराज्ञांविशांचतेह्यधिकृताएवेति॥तेषामप्यात्माभवा
मि॥यद्यशोहमनुप्रापत्सिप्राप्तुमिच्छामिमहाद्यशसामात्मनादेहेंद्रियमनोबुद्धिलक्ष
णानामात्मा॥किमर्थमिदमेवंप्रपद्यइत्युच्यते॥श्येतंवर्णतःपक्वबदरसमंरोहितंतथाद
त्कंदंतरहितमप्यदत्कंभक्षयितृतेजोबलवीर्यविज्ञानधर्माणामपहंतृविनाशयितृतत्
तत्सेविनांस्त्रीव्यंजनं॥यद्देवंलक्षणंश्येतंलिंदुपिच्छिलंमाभिगांमाभिगच्छेयं॥द्विर्वचनम
स्यंतानर्थहेतुत्वप्रदर्शनार्थं॥७॥१४॥तद्धैतदात्मज्ञानंसोपकरणमोमित्येतदक्षर
मित्याद्यैःसहोपासनैस्तद्वाचकेनग्रंथेनाष्टाध्यायीलक्षणेनसहब्रह्माहिरण्यगर्भःप
रमेश्वरोवातद्वारेणप्रजापतयेकश्यपायोवाचासावपिमनवेस्वपुत्रायमनुःप्रजाभ्यइ
त्येवंश्रुत्यर्थसंप्रदायपरंपरयागतमुपनिषद्विज्ञानमद्यापिविद्वत्स्ववगम्यते॥यथेहषष्ठा
द्यध्यायत्रयप्रकाशितात्मविद्यासफलावगम्यते॥तथाकर्माणिनकस्त्वनार्थइतिप्राप्तेत

दानर्थक्यप्राप्तिपरिजिहीर्षयेदंकर्मविद्भिरनुष्ठीयमानस्यविशिष्टफलत्वेनार्थवत्त्व
मुच्यते॥आचार्यकुलाद्वेदमधीत्यसहार्थतोध्ययनंकृत्वायथाविधानंयथास्मृत्युक्तै
र्नियमैर्युक्तःसन्नित्यर्थः॥सर्वस्यापिविधेःस्मृत्युक्तस्योपकुर्वाणकंप्रतिकर्तव्यत्वेगुरुशु
श्रूषायाःप्राधान्यप्रदर्शनार्थमाहगुरोःकर्मयत्कर्तव्यंतत्कृत्वाकर्मशून्योयोतिशि
ष्टःकालस्तेनकालेनवेदमधीत्येत्यर्थः॥एवंनियमवताधीतोवेदःकर्मज्ञानफलप्राप्त
येभवति॥नान्यथेत्यभिप्रायोभिसमावृत्यधर्मजिज्ञासांसमापयित्वागुरुकुलान्नि
वृत्यन्यायतोदारानाहृत्यकुटुंबेस्थित्वागार्हस्थ्येविहितेकर्मणितिष्ठन्नित्यर्थः॥तत्रापि
गार्हस्थ्ये॥विहितानांकर्मणांस्वाध्यायस्यप्राधान्यप्रदर्शनार्थमुच्यते॥शुचौविविक्तेमे
ध्यादिरहितेदेशेयथावदासीनःस्वाध्यायमधीयानोनैत्यकमधिकंचशक्तितऋगाद्य
भ्यासंचकुर्वन्॥धार्मिकान्पुत्रान्शिष्यांश्चधर्मयुक्तान्विदधद्धार्मिकत्वेनतान्नियम
यन्नात्मनिस्वहृदयेहार्देब्रह्मणिसर्वेंद्रियाणिप्रतिष्ठाप्योपसंहृत्यइंद्रियग्रहणात्क
र्मणिचसंन्यस्याहिंसन्हिंसांपरपीडामकुर्वन्सर्वभूतानिस्थावरजंगमानितान्य

पीडयन्नित्यर्थो भिक्षानिमित्तमटनादिना परपीडा स्यादित्यत आहान्यत्र तीर्थेभ्यस्तीर्थं
नाम शास्त्रानुज्ञाविषयस्ततोन्यत्रेत्यर्थः। सर्वाश्रमिणां चैतत्समानं तीर्थेभ्योन्यत्राहिंसैवे
त्यन्ये वर्णयंति। कुटुंब एवैतत्सर्वं कुर्वन्स खल्वधिकृतो यावदायुषं यावज्जीवमेवं यथो
क्तेन प्रकारेणैवं वर्तयन्॥ ब्रह्मलोकमभिसंपद्यते देहांते न च पुनरावर्तते॥ पुनरावृत्तेः
प्राप्ताप्रतिषेधात्कार्यं ब्रह्मलोकमभिसंपद्य यावद्ब्रह्मलोकस्थितिस्तावत्तत्रैव तिष्ठति
॥प्राक्ततो नावर्तत इत्यर्थो द्विरभ्यास उपनिषद्विद्यासमाप्त्यर्थः॥ ॥छ॥ ॥श्री॥ ॥
॥छ॥ ॥इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्री
मच्छंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे अष्टमः प्रपाठकः समाप्तः॥ ॥छ॥ ॥
॥ ॥श्री॥ ॥समाप्तमिदं छांदोग्योपनिषद्विवरणं॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥
॥ ॥छ॥ ॥श्री॥ ॥यादृशमिति न्यायान्न मे दोषः॥ ॥छ॥ ॥श्री॥ ॥
॥ ॥संवत् १७३२ वर्षे आषाढ शुदि ७ सोमे लिखितं॥ ॥मिदं॥ ॥पुस्तकं॥ ॥
॥ ॥छ॥ ॥श्री॥ ॥ग्रंथसंख्यामङ्क ४०००॥ ॥छ॥ कल्याणमस्तु॥ ॥छ॥ ॥